हय़ग्रीवः 55

दधि वामनः.. 56

सरस्वतीः 56

महालक्ष्मी 59

गङ्गा.. 63

वाळाम्.. 63

महिषमर्दिनिम् 63

मातङ्गीम्.. 64

त्रिपूरसुन्दरीम्.. 64

त्रिपूरभैरवीम्.. 64

काळरात्रिम्.. 64

भुवनेश्वरीम् 65

नारसिंही 65

उग्रताराम्.. 65

हरिः ॐ तत्सत्

ध्यानाबली

A Collection of Shlokas / Dhyanas

By

Debadatta Dash , Brahmapur, Odisha

1/1/2017

Disclaimer

The Shlokas in this Ebook is collected from various sources , both online and print media. You are free to use it for personal use only.

The font used is Mangal Unicode with Google Keyboard For Indian Languages . For querries and suggestions contact hello.d3b@gmail.com

Page Setup & Printing

In the Page setup goto Margins , set Orientation =Landscape , Multiple Pages = Book Fold , Sheets per Page = 4 . Add Gutter too. In the Paper Tab set Papersize such that the width of the booklet is half of the Paper width (A5 for printing in A4 Paper).

Select the Paper size as A4 , Pages per sheet as 1 , Orientation as Portrait , Scale as Fit to pages. This will Print 2 pages on A4 sheet on each side. If you print from the PDF just print Odd pages and then Even pages with Scaling as Stretch to Fit.

Contents

शिव 6
भैरब 19
बृषभ 23
सर्प 24
कार्त्तिकेय़ 24
नबग्रह 26
हनुमान 32
श्रीगणेश 36
श्रीनरसिंह 40
श्रीऱामः 42
विष्णुः, कृष्णः 48
जगन्नाथः 54
वराह 55

बालेन्दु द्युतिलोक पिङ्गलजटा भार प्रबद्धोरगं
बन्दे सिद्धसुरासुरेन्द्र नमितं पूर्बं मुखं शूलिनः ।4

ब्यक्ताब्यक्त गुणोत्तरं सुबदनं षडबिंश तत्बाधिकं
तस्मादुत्तर तत्बमक्षयमिति धेयं सदा य़ोगिभिः ।
बन्दे तामस बिर्जतेन मनसा सूक्ष्माति सूक्षंपरं
शान्तं पञ्चममीश्बरस्य बदनं खब्याप्त तेजोमयं ।5।

ध्येयः पञ्चमुखो रुद्रः स्फटिकामलकान्तिमान्
बिद्युच्छुभ्रासितरजः श्यामान्यस्यमुखानितु
जटाबबद्धेन्दुकलः प्रियायुङ्नागभूषणः ।।

ॐ नमः शिबाय शान्ताय, कारण त्रय हेतबे ।
निबेदयामि चात्मानं त्बं गतिः परमेश्बरः ।।
मृत्युञ्जयाय देबाय निलकण्ठाय सम्भबे ।
अजायेशाय सर्बाय महादेबायते नमः ।।
शिबाय नीलकण्ठाय महादेबाय शूलिने ।
भीमाय भीमनाशाय पशुनां पतये नमः ।।

कर्पूरगौरं करुणावतारं
संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे
भवं भवानीसहितं नमामि ॥ ॥

वन्दे देब उमापतिं सुरगुरुं वन्दे जगत्कारणम् ।
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्य शशाङ्क वह्निनयन वन्दे मुकुन्द प्रियम् ।

आनन्दभैरवीम् 65

वगळामूखीम् 66

श्रीदेबी 66

गाय़त्री 73

वरुणः 73

कुवेरः 74

गरुडः 74

श्रीगुरु 74

शान्तिपाठ 75

देश मातृका 78

शिव

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः
भवे भवे नातिभवे भवस्व माम् भवोद्भवाय नमः ।
वामदेवाय नमो ज्येष्ठाय नमः । श्रेष्ठाय नमो रुद्राय नमः ।
कालाय नमः । कलविकरणाय नमः । बलाय नमः । बलविकरणाय
नमः ।
बलप्रमथाय नमः । सर्वभूतदमनाय नमो मनोन्मनाय नमः
अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः
सर्वेभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्
ॐ त्रयम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॥ ॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय
हिरण्यपतये अम्बिकापतय उमापतये पशुपतये नमो नमः ।
ऋतँ सत्यं परं ब्रह्मं पुरुषं कृष्णपिङ्गलम्
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ।
ॐ तत्पुरुषाय विद्महे बाक् बिशुद्धाय धीमहि तन्नो शिबः प्रचोदयात् ।
ॐ महादेबाय विद्महे रुद्रमूर्तये धीमहि तन्नो शिबः प्रचोदयात् ।
नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यंबकाय
त्रिपुरान्तकाय त्रिकाग्नि-कालाय कालाग्निरुद्राय नीलकण्ठाय
मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥
॥ याज्ञिक्युपनिषत् ॥
सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु , पुरुषो वै रुद्रः सन्महो नमो नमः ।

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ।
कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे
वोचेम शंतमँ हृदे सर्वोह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ।।

ध्याये नित्यं महेशं रजतगिरिनिभं चारूचंद्रां वतंसं।
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम।।
पद्मासीनं समंतात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं।
विश्वाद्यं विश्वबन्द्यं निखिलभय हरं पञ्चवक्त्रं त्रिनेत्रम्।।

प्रालेया चलबिन्दु कुन्द धबलं गोक्षीर फेन प्रभम्
भष्माभ्यङ्गमनङ्ग देह दहनं ज्बालाबली लोचनम् ।
ब्रह्मेन्द्राग्नि मरुद्गणैः स्तुतिपरैरभ्यर्च्चितं य़ोगिभि
बन्देहं सकलं कलङ्क रहितं स्थाणोर्मुखं पश्चिमं ।1

गौरं कुङ्कुम पिङ्गलं सुतिलकं ब्यापाण्डु गण्डस्थलं
भ्रुबिक्षेप कटाक्ष बीक्षण लसत् संसक्त कर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालङ्कृतं
बन्दे पूर्ण शशाङ्क मण्डल निभं बक्त्रं हरस्योत्तरम् ।2

कालाभ्र भ्रमराञ्जनाचलनिभं ब्यादीप्त पिङ्गेक्षणं
खण्डेन्दु द्युति मिश्रितोग्रदशन प्रोद्भिन्न दंष्ट्राङ्कुरम् ।
सर्बप्रीत कपाल शुक्ति सकलं ब्याकीर्ण संच्छेखरं
बन्दे दक्षिणमीश्बरस्य जटिलं भ्रूभङ्ग रौद्रं मूखम् ।3

सम्बर्त्ताग्नि तडित् प्रतप्तकनकं प्रस्पाधि तेजोमयं
गम्भीर स्मितनिःसृतोग्रदशनं प्रोद्भासिताम्राधरं ।

चिता भष्मा लेपः स्रगपि नृकरोटी परिकरः
अमङ्गल्यं शीलं तब भबतु नामैक मखिलं
तथापि स्मर्तृणां बरद परमं मङ्गलमसि ।।

मन्दारमाला परिशोभितायै कपालमालाङ्कित शेखराय
दिब्याम्बरायै च दिगम्बराय नमः शिबायै च नमः शिबाय ।।

त्रिनेत्राय नमस्तुभ्यं उमादेहार्द्ध धारीणं
त्रिशुल धारिणे तुभ्यं भूतानां पतये नमः ।।

गङ्गाधर नमस्तुभ्यं बृषध्बज नमस्तुते
आशुतोष नमस्तुभ्यं भुयोभुयो नमोनमः ।।

पापोहं पापकर्माहं पापात्मा पाप सम्भब
त्राहिमाम् पार्बतीनाथ सर्बपाप हरोभब ।।

मन्त्रहीनं क्रिया हीनं भक्तिहीनं सुरेश्बर
जत्पुजितं मयादेब परिपूर्णं तदस्तुमे ।।

अपराध सहश्राणि क्रियन्तेह्यर्निशं मया
दासोयमिति मांमत्बा क्षमस्ब परमेश्बर ।।

कैलासाद्रिनिभं शशाङ्क शकल स्फुर्ज ज्जटामम्डितं
नासालोकन तत्परं त्रिनयनं बीरासना ध्यासितं ।
मुद्राटङ्क कुरङ्ग जानुबिलसत् पाणिं प्रसन्नानं
कक्षाबद्ध भुजङ्गमं मुनिबृतं बन्दे महेशं परं ।।

चन्द्रार्काग्नि बिलोचनं स्मितमूखं पद्म द्वयान्तः स्थितं
मुद्रा पाश मृगाक्ष सूत्र बिलसत् पाणिं हिमांशु प्रभम् ।

वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ।

शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमम् ।
शिवमार्ग प्रणेधरम् प्रणतोस्मि सदाशिवम् ॥ ॥

शान्तं पद्मासनस्थं शशधरमकुटं पञ्चववत्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तम्।
नागं पाशं च घण्टां डमरुकसहितं चांकूसं वामभागे
नानालङ्कार युक्तं स्फटिकमणिनिभं पार्वतीशं नमामि॥

पीठं यस्य धरित्री जलधर कलशं लिंगमाकाशमूर्तिं
नक्षत्रं पुष्पमाल्यं ग्रहगण कुसुमं नेत्रं चंद्रार्क बह्निनम्
कुक्ष्यौ सप्त समुद्राः भुजगिरि शिखरं सप्त पाताल पादं
एबम देबं षडांगम दश दिश वसनं दिव्यलिंगं नमामि ॥

मङ्गलं भगवान् शंभुः मङ्गलं वृषभध्वजः ।
मङ्गलं पार्वतीनाथो मङ्गलायतनो हरः ॥ ॥

असितगिरिसमस्यात् कज्जलं सिंधूपात्रे
सुरतरुवरशाखा लेखनी पत्रमूर्वी ।
लिखति यदि गृहित्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥ ॥

प्रथमंच महादेबं द्बितीयंच महेश्बरं
तृतीयं शङ्करं नाम चतुर्थं बृषभ ध्बजः ।
पञ्चमं कृत्तिबासंच षष्ठं कामाङ्ग नाशनं
सप्तमं देब देबेश नीलकण्टं अथाष्टमं ।
नबमं इश्बरं नाम दशमं पार्बती प्रियं

रुद्रमेकादशं नाम द्वादशं शिबमुच्यते ।
एतानि शिब नामानि त्रिसन्ध्यं य़ः पठेन्नरः
गोघ्नश्चैब कृतघ्नश्च ब्रह्महागुरुतल्पगः ।
स्त्रिबाल घातक श्चैब कृतघ्न बृषलीपतिः
मुच्यते सर्बपापेभ्यः शिबलोकं स गच्छति ।।

पाशाङ्कुश बराक्षस्रक् पाणि शितांसु शेखरम्
त्र्यक्षं रक्त सुबर्णाभ मर्द्धनारीश्बरं भजे ।।
बन्धुक काञ्चननिभं ऋचिराक्षमालां
पाशाङ्कुशौच बरदं निज बाहु दण्डैः ।
बिभ्राणमिन्दु सकलाभरणं त्रिनेत्रं
अर्द्धाम्बिकेश मनिशं बपुराश्रयामः ।।

बन्धुकाभं त्रिनेत्रं शशि सकलधरं स्मेर बक्त्रं बहन्तं
हस्तैःशूलं कपालं बरदमभयदं चारुहारं नमामी ।
बामोरस्तम्भोगायाः करतल बिलसत् च्चारुरक्तोत्पलाया
हस्तेनाश्लिष्ट देहं मणिमय बिलसत् भूषणायाः प्रियायाः ।।

य़स्याङ्के च बिभाति भूधर सुता देबापदा मस्तके
भाले बाल बिधु गलेच गरलं य़स्योराशि ब्यालराट् ।
स्बयं शिब बिभुषणं सुरबरं सर्बाधिपं सर्बदा
सर्बः सर्बगतः शिब शशिनिभं श्रीशङ्करं पातु मां ।।

ॐ त्रिनेत्रं चतुर्भुजं सौम्यं शान्तं सर्बाभरण भूषितं
नीलग्रीबं शशाङ्क चिह्नं शुद्ध स्फटिक संकाशं
नागय़ज्ञोपबीतिनं ब्याघ्रचर्मोत्तरीयकं
कमण्डल्बक्ष सूत्रहस्तं अभयबरद हस्तं त्रिशूलहस्तं

ज्बलत् कपिल जटाशिखमुद्योत्पाटिनं अमृतेन परिप्लुतं
दिब्यभोग समाकुलं दिग्देबता समाबृतं
सुरासुरैनमष्कृतं बृषभस्कन्धसमारुढं
उमादेहार्द्ध धारिणं नित्यं शाश्बतं
शुद्धं धृबमक्षयमब्ययमब्यक्तं
बिश्बरुपिणं श्रीऋद्रं ध्यायेत् ।।

चन्द्रार्काग्नि बिलोचनं स्मितमूखं पद्म द्वयान्तः स्थितं
मुद्रा पाश मृगाक्ष सूत्र बिलसत् पूर्णेन्दुकान्त्याप्लुतं ।
कोटिरिन्दुगलत् सुधाप्लुत तनुं हारादि भूषोज्बलं
कान्त्याबिश्बबिमोहनं पशुपतिं मृत्युञ्जयं भाबयेत् ।।

शान्ताकारं शिखरि शयनं नीलकण्ठं सुरेशं
बिश्बाधार स्फटिक सदृशं शुभ्रबर्णं शुभाङ्गं ।
गौरीकान्तं त्रितय नयनं य़ोगिभिः ध्यानगम्यं
बन्दे शम्भुं भबभयहरं सर्बलोकैकनाथं ।।

अञ्जनाद्रिनिभं देबं पिङ्गकेशं द्बिबाहुकं
आशाम्बरं सर्पभूषा भूषितं प्रणमामितं ।।

बन्दे देब उमापति सुरगुरुं बन्दे जगत्कारणं
बन्दे पन्नग भूषणं मृगधरं बन्दे पशुनां पतिम्
बन्दे सूर्य्य शशाङ्क बह्नि नयनं बन्दे मुकुन्द प्रियं
बन्दे भक्तजनाश्रयंच बरदं बन्दे शिबं शङ्करं ।।

बन्दे महेशं सुरसिद्ध सेबितं भक्तैः सदा पुजित पादपद्मम्
ब्रह्मेन्द्र बिष्णु प्रमुखैश्च बन्दितं ध्यायेत् सदा कामदुघं प्रसन्नम् ।।

श्मशानेष्बा क्रीडा स्मरिहर पिशाचाः सहचर

हृदय कमल मध्ये चिन्तयेत् पञ्चबक्त्रं ।।

नील प्रबाल ऋचिरं बिलस त्रिनेत्रं
पाशारुणोत्पल कपालक शूलहस्तं ।
अर्द्धाम्बिकेश मनिशं प्रबिभक्तभूषं
बालेन्दु बद्ध मुकुटं प्रणमामि रुपम् ।।

भूत्यालेपन भूषितः प्रबिलसत् नेत्राग्नि दीपाङ्कुरः
कण्ठे पन्नग पुष्पदाम सुभगो गङ्गाजलैः पूरितं ।
इष ताम्र जटाग्र पल्लबयुतो न्यस्तो जगन्मण्डपे
शम्भु र्मङ्गल कुम्भता मुपगतो भूयात् सतां श्रेयसे ।।

दक्षाकस्थं गजपतिमुखं प्रामृशन् दक्षदोष्णा
बामोरुस्थं नगपतनया के गृहं चापरेण ।
इष्टाभीती परकरयुगे धारयन् इन्दुकान्ति
रब्यादस्मां स्त्रिभुबनरतो निलकण्ठ स्त्रिनेत्रः ।।

स्फटिक रजत बर्णं मौक्तिकी मक्षमाला
ममृत कलशबिद्या ज्ञानमुद्राः कराग्रैः ।
दधत मुरग कक्षं चन्द्रचूडं त्रिनेत्रं
बिधृत बिबिध भूषं दक्षिणामूर्त्तिमीडे ।।

ध्यायेन्नीलाद्रिकान्तं शशि सकलधरं मुण्डमालं महेशं
दिग्बस्त्रं पिङ्ग केशं डमरुमथ सृणिं खड्गपाशाभयानि ।
नागं घण्टां कपालं करसिरसि रुहै बिभ्रतं भीमदंष्ट्रं
दिब्याकल्पं त्रिनेत्रं मणिमय बिलसत् किङ्किणी नूपुराढ्यं ।।

मृत्युञ्जय महारुद्र त्राहिमां शरणागतम्

कोटिरिन्दुगलत् सुधाप्लुत तनुं हारादि भूषोज्बलं
कान्त्याबिश्वबिमोहनं पशुपतिं मृत्युञ्जयं भाबयेत् ।।

हस्ताभ्यां कलशद्वया मृतरसै राप्लाबयन्तं शिरो
द्वाभ्यां तौ दधतं मृगाक्ष बलये द्वाभ्यां बहन्तं परम् ।
अङ्कन्यस्त कर द्वया मृतघटं कैलास कान्तं शिबं
स्बच्छाम्भो जगतं नबेन्दु मुकुटं देबं त्रिनेत्रं भजे ।।

हस्ताम्भोज युगस्थ कुम्भ युगला दधृत्य तोयं शिरः
सिञ्चन्तं करयोर्युगेन दधतं स्बाङ्के सकुम्भौ करौ ।
अक्षस्रक् मृगहस्त मम्बुजगतं मूर्द्धस्थ चन्द्र स्रबत्
पीयुषोन्नतनुं भजेस गिरिजं मृत्युञ्जयं त्र्यम्बकं ।।

बिभ्रद्दोर्भि कुठारं मृगमय बरौ सुप्रसन्नो महेशं
सर्बालङ्कार दीप्तः सरसिज निलयो ब्याघ्रचर्माभबासाः ।
ध्येय मुक्ताङ्गरागा मृतरस कणिका द्रिप्रभः पञ्चबक्त्रं
त्यक्षः कोटीर कोट्यु च्चटित हेमरुचि सर्बदा चन्द्रमौलिः ।।

बन्देबाल स्फटिक सदृशं कुन्तलोल्लासि बक्त्रं
दिब्याकल्पैर्नबमणिमयैः किङ्किणी नूपुराद्यैः ।
दीप्ताकारं बिशद बसनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां बटुक मनिशं शूलदण्डौ दधानम् ।।

उद्यत्भास्कर सन्निभं त्रिनयनं रक्ताङ्गराग स्रजं
स्मेरास्य बरदं कपाल मभयं शूलं दधानं करैः ।
नीलग्रीब मुदार भूषण शतं शीतांशु चुडोज्बलम्
बन्धुकारण बाससं भयहरं बन्दे सदा भाबये ।।

ध्याये नीलाद्रि कान्तं शशिसकल धरं मुण्डमालं महेशं
दिग्बस्त्रं पिङ्गकेशं डमर मथसृणिं खड्गपाशा भयानि ।
नागं घण्टां कपालं करसिरसिरुहैर्बिभ्रतं भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमय बिलसद् किङ्किणिं नूपुराढ्यम् ।।

मुक्तापीत पयोद मौक्तिक जबाबर्णैर्मुखै पञ्चभिः
स्त्र्यक्षै रञ्चितमीशमिन्दू मुकुटां पूर्णेन्दु कोटिप्रभं ।
शूलंटङ्क कृपाण बज्रदहना नागेन्द्र घण्टाङ्कुशाः
पाशं भीतिहरं दधान नमिता कल्पं ज्बलाङ्गं भजे ।।

बालार्क य़ुततेजसं धृतजटा जुटेन्दु खण्डोज्बलं
नागेन्द्रैः कृतशेखरं जपबटी शूलं कपालं करैः ।
खट्बाङ्गम् दधतं त्रिनेत्र बिलसत् पञ्चाननं सुन्दरम्
ब्याघ्रत्बक् परिधान मबजनिलयं श्री नीलकण्ठं भजे ।।

गात्रं भष्मसितं सितञ्च हसितं हस्ते कपाल सीतं
खट्बाङ्गञ्च सितं सितश्च बृषभः कर्णेसिते कुण्डले ।
गङ्गा फेनसीता जटापशुपते श्चन्द्रः सितोमूर्द्धनी
सोयं सर्बसितो ददातु बिभबं पापक्षयं सर्बदा ।।

बेदान्तेषु य़मातु रेकपुरुषं ब्यप्यस्थितं रोदसी
य़स्मिन् इश्बर इत्यनन्य बिषयः शब्दोय़थार्थाक्षरः ।
अन्तर्य़श्च मुमुक्षुभि र्नियमित प्राणादिभिं र्मृच्यते
सस्थाणुः स्थिरभक्ति य़ोग सुलभो निःश्रेय सायास्तुबः ।।

कैलाशाचल सन्निभं त्रिनयनं पञ्चास्य मन्बायुतं
नीलग्रीब भूषणधरं ब्याघ्रत्बचा प्राबृतं ।
अक्षस्रग् बरकुण्डिका भयधरं चान्द्रिकलां बिभ्रतं
गङ्गाम्भो बिलस ज्जटं दशभूजं बन्दे महेशं परं ।।

आपातालनभःस्थलान्तभुवनब्रह्माण्डमाविस्फुर–
ज्ज्योतिः स्फाटिकलिङ्गमौलिविलसत् पूर्णेन्दुवान्तामृतैः ।
अस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकाञ्जपन्
ध्यायेदीप्सित सिद्धयेऽद्रुतपदं विप्रोऽभिषिञ्जेच्छिवम् ॥

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दाकलित शशिकलाश्चण्डकोदण्डहस्ताः ।
त्र्यक्षा रुद्राक्षमालाः प्रणतभयहराः शांभवा मूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्तप्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥

भ्राजचन्द्र जटाधरं त्रिनयनं निलाञ्जनादि प्रभं
दोर्द्दण्डा त्तगदा कपालमरुण स्रग्गन्ध बस्त्राज्बलम् ।
घण्टामेखल घर्घर ध्बनि मिलद् झङ्कार भीमं बिभूं
बन्देहं सित सर्प कुण्डल धरं श्रीक्षेत्रपालं सदा ।।

चन्द्रोद्भासित मुर्द्धजं सुरपति पीयुष पात्रं महत्
हस्ताब्जेन दधत्सु दिब्यममलं हास्यास्य पङ्केरुहम् ।
सूर्य्येन्धग्नि बिलोचनं करतलैः पाशाक्ष सूत्राङ्कुशा
म्भोजं बिभ्रत मक्षय पशुपतिं मृत्युञ्जयं तं स्मरे ।।

जं जं जं यक्षरूपं दशदिश धूमितं भूमि कम्पायमानं
सं सं संहारमूर्तिं शिरमुकुटजटा शिखरे चन्द्रबिन्दु ।
दं दं दं दीर्घकायं विकृतनख मुखं चोर्ध्वरोमं करालं
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ १॥

धबल बपुष मिन्दो र्बद्धि पद्मासनस्थं
भुजगबलयहारं भष्म दग्धाङ्ग मीशं ।
हरिण परशु पाणिं चन्द्रमौलिं त्रिनेत्रं

अग्निबर्ण समोपेतं सारमेय समन्बितम् ।।

बन्देबालं स्फटिक सदृशं कुण्डलोद्भासिताङ्गम्
दिब्याकल्पै र्नबमणिमयैः किङ्किणी नूपुराढ्यैः
दीप्ताकारं बिशद बदनं सुप्रशन्नं प्रसन्नं
त्रिनेत्रं हस्ताग्राभ्यां बटुक सदृशं शूलदण्डौ दधानम् ।।

उद्यद्भास्कर सन्निभं त्रिनयनं रक्ताङ्गराग स्रजम्
स्मेरास्यं बरदं कपाल मभयं शूलं दधानं करैः ।
नीलग्रीब मुदार भूषण युतं शीतांशु खण्डोज्बलं
बन्धुकारण बाससं भयहरं देबं सदा भाबयेत् ।।

करकलित कपालः कुण्डलि दण्डपाणि
स्तत्रूणतिमिर नीलो ब्याल यज्ञोपबीती ।
ऋतु समय सपर्या बिघ्न बिच्छेद हेतु
र्जयति बटुकनाथः सिद्धिदः साधकानाम् ।।
अनील कुन्तल मलक्तक रक्तबर्णं
मौलिकृतं कृत मनोज्ञ मुखारबिन्दम् ।
कल्याण कीर्त्ति कमनीयक शूलपाणिं
बन्दे महा बटुकनाथ मभीष्टसिद्धये ।।
आनम्र सर्ब गीर्बाण शिरोभृङ्गाङ्ग सङ्गिनम्
भैरबस्य पदाम्भोजं भुयोहं नौमिभूतये ।।

तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ ॥

ॐ कौमारीशक्ति संयुक्तं शिखिवाहन भूषितम्
गौरवर्णधरं देबं वन्दे श्रीचण्डभैरवम् ।।

जन्ममृत्यु जरारोगैः पीडितं कर्मबन्धनैः ।
ताबक स्तद्गत प्राण स्त्बच्चिर्त्तोहं सदामृड
इति बिज्ञाप्य देबेशं जपेन् मृत्युञ्जयं परम् ।।

बन्धूकसन्निभ देबं त्रिनेत्रं चन्द्रशेखरम्
त्रिशूल धारिणं बन्दे चारुहासं सुनिर्मलं ।
कपालधारिणं देबं बरदाभयहस्तकम्
उमया सहितं शम्भुं ध्यायेत्सोमेश्बरं सदा ।।

ॐ रुद्रं चतुर्बुजं देबं त्रिनेत्रं बरदाभयं
दधानमूर्ध्बहस्ताभ्यां शूलं डमरुमेबच ।
अंकसंस्थामुमां पद्मे दधानं च करद्बये
आद्ये करद्बये कुम्भं मातुलुंगं च बिभ्रतम् ।

ॐ भगबन् देबदेबेश शूलभृद्बृषबाहन
इष्टानिष्टं समाचक्ष्ब मम सुप्तस्य शाश्बतः ।
ॐ नमोऽजाय त्रिनेत्राय पिङ्गलाय महात्मने
बामाय बिश्बरुपाय स्बप्नाधिपतये नमः ।
स्बप्ने कथय मे तथ्यं सर्बकार्येष्बशेषतः
क्रियासिद्धिं बिधास्यामि त्बत्प्रसादात् महेश्बर ।।

आकर्णकृष्टे धनुषि ज्वलन्तीं देवीमिषुं भास्वति सन्दधानम् ।
ध्यायेन्महेशं महनीयवेषं देव्या युतं योधतनुं युवानम् ॥

ध्यायेद्देवं सस्मितं स्यन्दनस्थं देव्या सार्धं तेजसा दीप्यमानम् ।
इष्विष्वासालन्कृताभ्यां भुजाभ्यां शूराकारं स्तूयमानं सुरौघैः ॥

स्मेराननं चन्द्रकलावतंसं गंगाधरं शैलसुतासहायम् ।
त्रिलोचनं भस्मभुजंगभूषणं ध्यायेत्पशूनां पतिमीशितारम् ॥

सांग्रामिकेन वपुषा प्रविराजमानं देवं पुरत्रयविनाशनमन्दहासम् ।
दैत्यान् दिधक्षुमचलेश्वरचापपाणिं ध्यायेत्पुरारिमथ भूमिरथाधिरूढम् ॥

चन्द्रार्धमौलिं कालारिं व्यालयज्ञोपवीतिनम् ।
ज्वलत्पावकसंकाशं ध्यायेद्देवं त्रिलोचनम् ॥

मण्डलान्तरगतं हिरण्मयं भ्राजमानवपुषं शुचिस्मितम् ।
चण्डदीधिति मखण्डितद्युतिं चिन्तयेत्मुनिसहस्रसेवितम् ॥

शरच्चन्द्रप्रकाशेन वपुषा शीतलद्युतिम् ।
ध्यायेत्सिहमासिनासीनमुमया सहितं शिवम् ॥

उद्यद्भास्करकोटिप्रकाशं आदीप्तदहनमूर्धानम् ।
भीषणभुजङ्गभूषं ध्यायेद्विविधायुधं रुद्रम् ॥

भस्मोद्धूलितसर्वाङ्गं जटामण्डलमण्डितम् ।
ध्यायेद्देवं वृषारूढं गणेश्वरयुतं हरम् ॥

मुक्तालंकृतसर्वाङ्गमिन्दुगङ्गाधरं हरम् ।
ध्यायेत्कल्पतरोर्मूले समासीनं सहोमया ॥

बिसर्ग बिन्दु मात्राणि पद - पादाक्षराणि च
न्यूनानि चातिरिक्तानि क्षमस्व परमेश्बर ।

मन्त्रहीनं क्रिया हीनं भक्ति हीनऽर्थ पूजितं ।
यत्पूजितं मया देव परिपूर्ण तदस्तु मैं ॥
यदक्षर पदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्व क्षम्यतां देव प्रसीद परमेश्वर ॥

नमो निष्कळरूपाय़ नमो निष्कळतेजसे
नमः सकळनाथाय़ नमस्ते सकळात्मने
नमः प्रणववाच्याय़ नमः प्रणवलिङ्गिने
नमः सृष्ट्यादिकर्त्रेच नमः पञ्चमुखाय़ते
पञ्चव्रह्मस्वरूपाय़ पञ्चकृत्याय़ते नमः
आत्मने व्रह्मणे तुभ्यमनन्तगुणशक्तये़
सकळाकळरूपाय़ शंभबे गुरबे नमः ।। (शिवपूराण)

ॐ नमोऽस्तु स्थाणुभूताय़ ज्योतिलिङ्गामृतात्मने ।
चतुर्मूर्तिवपुःस्थाय़ भसिताङ्गाय़ शम्भवे ।

कैळासाचळसन्निभं त्रिनय़नं पञ्चास्यमम्वायुतं
नीळग्रीवमहीशभूषणधरं व्याघ्रत्वचा प्रावृतम् ।
अक्षस्रग्वरकुण्डि काभय़करं चान्द्रीं कळां बिभ्रतं
गङ्गाभोविलसज्जटं दशभुजं वन्दे महेशं परम् ।।

भैरब

ॐ शुद्ध स्फटिक संकाशं सहस्रादित्य बर्च्चसं
नीलजीमूत संकाशं नीलाञ्जन समप्रभम् ।
अष्टबाहु त्रिनयनं चतुर्बाहु द्विबाहुकम्
दंष्ट्रा कराल बदनं नूपूरा राब संकुलम् ।
भूजङ्ग मेखलं देबं अग्निबर्ण शिरोरुहम्
दिगम्बर कुमारेशं बटुकाक्षं महाबलम् ।
खट्बाङ्गमा सिपाशञ्च शूलं दक्षिण भागतः
डमरुं च कपालञ्च बरदं भुजगं तथा ।

त्रिधाबद्धो बृषभोरोरबीति महादेबो मर्त्यां आबिबेश ।।

कण्ठालङ्कार घण्टा घणघण रणिता ध्मात रोदं कटाहं
कण्ठेकालाधिरोहो बितघन शुभगं भाबुकं स्निग्ध पृष्ठः ।
साक्षात् धर्मो बपुष्मान् धबल ककुद निधुत् कैलाशगिरी कूटः
कुटस्थ काकुद्मा न्निबिडतरतमः स्तोमतृण्यां बितृन्यात् ।।

ॐ प्रैतुबाजी कनिक्रद न्नानद द्रासभ पत्बा
भरन्नग्निं पुरीष्यं मापाद्यायुषः पुरा ।।

सर्प

य़ोषाबनन्त रूपेण ब्रह्माण्डं सचराचरं
पुष्पबत् धारयेत् मुर्द्ध्निं तस्मैनित्यं नमोनमः ।।

कार्तिकेय़

शम्भोनन्दन मग्निबर्च्चस मुदा राङ्गः भबानी सुतं
शान्तं शक्तिधरं षडाननमलं कारैरलं कारीतं
भाषा निर्जित हेम कुङ्कुम गरु गोरोचना शोभितं
ध्ध्यायेत् दैत्य कुलेश तारक रिपुं श्री कार्तिकेयं महः ।।

क्रौञ्चहन्त्रे नमस्तुभ्यं पार्बती प्रीति बर्द्धन
नमस्ते नाकसेनान्यै स्बर्गलोकं प्रयच्छमे ।
कुमारो शाङ्करो बीरो हैमबत्याः सुतोबिभुः
षण्मुखो सुर शतृघ्नो गुहः सेना बितर्द्दनः ।
गोप्ता गणपतिश्चण्डः सुब्रह्मण्यः शिबात्मजः
स्कन्दः सर्बसहोबीरः सुधन्बा समितिञ्जयः ।।

चामुण्डाशक्ति संयुक्तं प्रेतवाहन भूषितम्
रक्तवर्णधरं देबं वन्दे भीषण भैरवम् ।।

धारय़न्तं मदोन्मत्तं वडवानळ भैरवम्
चण्डिका शक्ति संयुक्तं वन्दे संहार भैरवम् ।।

ॐ शुद्धस्फटिकसंकाशं सहस्रादित्य वर्चसम् ।
नीळजीमूत संकाशं नीळाञ्जनसमप्रभम् ।।
अष्टवाहुं त्रिनय़नं चतुर्वाहुं द्विबाहुकम् ।
दंष्ट्राकराळवदनं नूपुरारावसंकुळम् ।।
भुजङ्गमेखळं देवमग्निवर्ण शिरोरुहम् ।
दिगम्वरं कुमारेशं वटुकाक्षं महाबळम् ।।
खट्वाङ्गमसिपाशं च शूळं दक्षिणभागतः ।
डमरुं च कपाळं च वरदं भुजगं तथा ।
अग्निवर्णसमोपेतं सारमेय़ समन्वितम् ।।

ॐ त्रिनेत्रं रक्तवर्णं च वरदाभय़हस्तकम् ।
सव्ये त्रिशूळमभय़ं कपाळं वरमेव च ।।
रक्तवस्त्र परीधानं रक्तमाल्यानुलेपनम् ।
नीळग्रीवं च सौम्यं च सर्वाभरणभूषितम् ।।

तुषारकर्णिकाभासं माय़ारूपमनन्तकम् ।
मूर्ध्नि खण्डेन्दुशकळं त्रिनेत्रं शान्ति लोचनम् ।।
सर्वकारण कर्तारं द्विभुजं रत्नभूषितम् ।
कपाळं वामहस्ते च सूक्ष्मदण्डं च दक्षिणे ।।
पाद नूपुर संयुक्तं छिन्नशीर्षविभूषितम् ।
सर्पमाळासमायुक्तं हस्तोरुस्थुळजानुषु ।।
अन्त्रमाळासमायुक्तं सर्वाभरणभूषितम् ।।

श्वेतवर्णं चतुर्वाहुं जटामुकुटधारिणम् ।
भुजङ्ग पाशहस्तं च हस्ते दण्डकमण्डळुम् ।।
शुक्लयज्ञोपवीतं च शुक्लकौपीन वाससम् ।
शुक्लवस्त्रपरीधानं श्वेतमाळानुलेपनम् ।।
त्रिनेत्रं नीळकण्ठं च मुक्ताभरणभूषितम् ।।

पीतवर्णं चतुर्वाहुं त्रिनेत्रं पीतवाससम् ।
अक्षय़स्वर्णमाणिक्यं तडित्पूरितपात्रकम् ।।
अभिळषितं महाशूळं तोमरं चामरद्वय़म् ।
सर्वाभरणसम्पन्नं मुक्ताहारोपशोभितम् ।।
मदोन्मत्तं सुखासीनं भक्तानां च वरप्रदम् ।
सन्ततं चिन्तय़ेद्वश्यं भैरवं सर्वसिद्धिदम् ।।
पारिजातद्रुमकान्तारस्थिते मणिमण्डपे ।
सिंहासनगतं ध्याय़ेद्भैरवं स्वर्णदाय़कम् ।।
गाङ्गेय़पात्रं डमरुं त्रिशूळं वरं करैः संदधतं त्रिनेत्रम् ।
देव्यायुतं तप्तसुवर्णवर्णं स्वर्णाकृतिं भैरवमाश्रय़ामि ।।
मन्दारद्दममूळभाजि सुमहामाणिक्यसिंहासने
संविष्टोदरभिन्नपङ्कजरुचा देव्याकृतालिङ्गनः ।।
भक्तेभ्यः कररत्नपात्रभरितं स्वर्णं ददानोऽनिशं
स्वर्णाकर्षणभैरवो विजय़ते स्वर्गापवर्गैकभूः ।।

वैष्णवी शक्ति संयुक्तं गरुडासनभूषितम्
नीळवर्णधरं देवं वन्दे श्रीक्रोधभैरवम् ।।
हेमवर्णधरं देवं तथा महिषवाहनम्
वाराहीशक्ति संयुक्तं वन्दे उन्मत्त भैरवम् ।।
चामुण्डा शक्ति संयुक्तं प्रेतवाहनभूषितम्
रक्तवर्णधरं देवं वन्दे भीषणभैरवम् ।।
धारय़न्तं मदोन्मत्तं वडवानळ भैरवम् ।

चण्डिकाशक्ति संयुक्तं वन्दे संहार भैरवम् ।।
इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारय़न्तं जपाभम् ।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्याय़ेद्वह्निं बद्धमैळिं जटाभिः ॥

गदात्रिशूळडमरुपात्रहस्तं त्रिलोचनम्
कृष्णाभं भैरवं ध्याय़ेत्सर्वविघ्ननिवारणम् ।।

सूर्यकोटिप्रतीकाशं चन्द्रकोटि सुशीतळम्
अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलोचनम् ।
अमृतार्णवमध्यस्थं व्रह्मपद्मोपरिस्थितम्
वृषारूढं नीळकण्ठं सर्वाभरणभूषितम् ।
कपाळखट्वाङ्गधरं घण्टाडमरुवादिनम्
पाशाङ्कुशधरं देवं गदामुसळधारिणम् ।
खड्गखेटकपट्टीशमुद्गरं शूळकुन्तळम्
विधृतं खेटकं मुण्डं वरदाभय़पाणिकम् ।
ळोहितं देवदेवेशं भावय़ेत्साधकोत्तमः ।।

क्षेत्रपाळम्
ॐ नीळाञ्जनादिनिभमूर्द्धपिशंगकेशं वृत्तोग्रलोचनमुदात्तगदा कपाळम्
आशाम्वरं भुजगभूषणमुग्रदंष्ट्रं क्षेत्रेशमद्भुततनुं प्रणमामि देवम् ।।

<u>बृषभ</u>

हिमालयाय बृषभं तीक्ष्णशृङ्गम् त्रिलोचनं
सर्बाभरण संय़ुक्तं नमामि बृषभं पूजेत् ।।

ॐ चत्बारि शृङ्गा त्रयोस्य पादाद्वेशीर्षे सप्तहस्तासोस्य,

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह।
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि
योऽसावसौ पुरुषः सोऽहमस्मि॥

ॐ रक्ताम्भो रुहमध्यरं त्रिनयनं रक्ताम्बरं भास्करं
रत्नौघाङ्ग बिभूषणं सुरनरैः संसेब्य पादाम्बुजम् ।
स्मेरास्या म्बुरुहं किरीट शिखरं पाशाङ्कुशा क्षाम्बुजम्
बिभ्राणं करपल्लबैः सुरुचितं मार्तण्डदेबं भजे ।।

नमोस्तु सूर्याय सहस्र भानबे नमोस्तु बैश्बानर जातबेदसे
त्बमेब चार्घ्यं प्रतिगृह्ण देब देबाधिदेबाय नमोनमस्ते ।।

नमो भगबते तुभ्यं नमस्ते जातबेदसे
दत्तमर्घ्यं मया भानो त्बं गृहाण नमस्तुते ।।

एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते
अनुकम्पायमां देब गृहाणार्घ्यं नमोस्तुते ।।

जबा कुशुम संकाशं काश्यपेयं महाद्युतिं
घ्नन्तारी सर्ब पापोघ्नं प्रणतोस्मी दिवाकर ।।

आरोग्यः प्रददातु नो दिनकरः चन्द्रोयशो निर्मलं
भूतिं भूमिसुतः सुधांशुतनयः प्रज्ञां गुरुर्गौरवम् ।
काव्यः कोमलवाग्विलासमतुलं मन्दो मुदं सर्वदा
राहुर्बाहु-बलं विरोध-शमनं केतुः कुलस्योन्नतिम् ॥ ॥

आदित्याय सोमाय मङ्गलाय बुधाय च ।

षडाननं कुङ्कुमरक्तवर्णं महामतिं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरसैन्यनाथं गुहं सदा शरणमहं प्रपद्ये ॥ ॥

नमो नमस्ते गुह शक्तिधाम्ने नमो नमस्ते गुह शक्तिधर्त्रे ।
नमो नमस्ते गुह देवसेना भर्त्रे नमस्ते कुलभूषणाय ॥ ॥

ज्ञानशक्तिधर स्कन्द वल्लीकल्याण सुन्दर ।
देवसेना मनः कान्त कार्तिकेय नमोऽस्तुते ।

ॐ यदक्रन्दः प्रथमं जायमान ऊद्यं समुद्रा दूत बा पुरीषात् ।
श्येनस्यपक्षा हरिणस्य बाहु उपस्तुत्यं महीजातं ते अर्बन् ।।

ॐ षडाननाय बिद्महे शक्तिहस्ताय धीमहि तन्नो स्कन्दः प्रचोदयात् ।।

बर्णं शुक्लं त्रिनेत्रं सकल गुणयुतं दक्षभागे मयूरं
बामपार्श्बे तु हंसं बिमल परिचयं बर्णमालं दधानं ।
द्ध्याये द्बेबं षाडास्यं मुनिगण नमितं तारका दैत्यबधं
संसारं रक्षयन्तं हरतनय महं कार्तिकेयं नमामि ।।

कार्तिकेय महाभाग मयूर बरबाहनं
तप्त काङ्चन बर्णाभं शक्तिहस्तं बरप्रदं ।
कार्तिकेय नमस्तेस्तु ऋद्रतेजः समुद्भबः
जितेन्दिय नमस्तेस्तु षण्मातुर नमोनमः ।।

कार्तिकेयं महाभागं मयुरोपरि संस्थितम्
तप्त काञ्चन बर्णाभं शक्तिहस्तं बरप्रदम् ।
द्बिभूजं शतृहन्तारं नानालङ्कार भूषितम्

प्रसन्न बदनं देबं कुमार पुत्रदायकम् ।।

स्बर्ग सेनापते नाथ सर्बप्रिय महाबल
नमस्तुभ्यं क्रौञ्चभि ते प्रसीदं बरदो भब ।।

शक्तिहस्तं बिरुपाक्षं शिखिबाहं षडाननम्
दारुणं रिपु रोगघ्नं भाबये कुक्कुटध्बजम् ।।

मयूराधिरूढं महावाक्यगूढं मनोहारि देहं महच्चित्तगेहम् ।
महीदेवदेवं महावेदभावं महादेवबालं भजे लोकपालम् ॥ ॥

सिन्दुरारुणमिन्दुकान्तिबदनं केयुरहारादिभिर्
दिब्यैराभरणैर्बिभूषिततनुं स्बर्गादिसौख्यप्रदम् ।
अम्भोजाभय शक्ति कुक्कुटधरं रक्ताङ्गरागोज्ज्बलम्
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्योतम् ।।

षड्बक्त्रं शिखिबाहनं त्रिनयनं चित्राम्बरालंकृतम्
बज्रं शक्तिमसिं त्रिशूलमभयं खेटं धनुश्चक्रकम् ।
पाशं कुक्कुटमङ्कुशं च बरदं दोर्भिर्दधानं सदा
ध्यायेदीप्सित सिद्धिदं शिबसुतं स्कन्दं सुराराधितम् ।।

<u>नबग्रह</u>

हंसः शुचिषद्वसुरन्तरिक्षस-
द्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

नम :सवित्रे जगदेक -चक्षुषे जगत्प्रसूति स्थितिनाशहेच्तवे
त्रयीमयाय त्रिगुणात्म-धारिणे विरिन्चि-नारायण-शंकरात्मने॥

ॐ ध्येयः सदा सवित्र मण्डल मध्यवर्ती नारायण सरसिजा सनसन्नि विष्टः
केयूरवान मकरकुण्डलवान किरीटी हारी हिरण्मय वपुर धृतशंख चक्रः ॥
आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ।।

ॐ खखोल्काय शान्ताय कारणत्रय हेतबे
निबेदयामिचात्मानं नमस्ते ज्ञानरूपिणे ।
त्बमेब ब्रह्म परममापो ज्योती रसोऽमृतम्
भूर्भुबः स्बस्त्बमोङ्कारः सर्बो ऋद्रः सनातनः ।। (गरुड पुराण)

रक्ताम्बुजासनमशेषगुणैकसिन्धुं
भानुं समस्तजगतामधिपं भजामि।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रम्॥

रक्ताब्जयुग्माभयदानबस्तं केयूरहाराङ्गदकुण्डलाढ्यम्
माणिक्यमौलिं दिननाथनीडे बंधूक कान्ति त्रिलसत्त्रिनेत्रं ।।

ॐ सूर्यं सुन्दरलोकनाथममृतं वेदान्तसारं शिवं
ज्ञानं ब्रह्ममयं सुरेशममलं लोकैकचितं स्वयम्।
इन्द्रादित्यनराधिपं सुरगुरुं त्रैलोक्यचूडामणिं
ब्रह्माविष्णुशिवस्वरूपहृदयं वन्दे सदा भास्करम् ॥

ॐ हिरण्मयेन पत्रेण सत्यस्यपिहितं मुखम्।
तत्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥

हरस्य मुकुटावास बाळचन्द्र नमोऽस्तुते ।।
सुधामया यत्किरणाः पोषयन्त्योषधीवनम् ।
सर्वान्नरसहेतुं तं नमामि सिन्धुनन्दनम् ।।
राकेशं तारकेशं च रोहिणीप्रिय सुन्दरम् ।
ध्यायतां सर्वदोषघ्नं नमामीन्दुं मुहुर्मुहुः ।।

मंगळस्य
जपाभं शिवस्वेदजं हस्तपद्मैर्गदाशूळशक्ती करे धारयन्तम् ।
अवंतीसमुत्थं सुमेषासनस्थं धरानन्दनं रक्तवस्त्रं समीडे ।।
वृहस्पति
रत्नाष्टापदवस्त्रराशिममळं दक्षात्किरन्तं करादासीनं
विपणौ करं निदधतं रत्नादिराशौ परम् ।
पीतालेपनपुष्पवस्त्रमखिळाळङ्कार सम्भूषितं
विद्यासागरवारगं सुरगुरुं वन्दे सुवर्णप्रभम् ।।
शुक्र
श्वेताम्भोजनिषण्णमापणतटे श्वेताम्बरालेपनं
नित्यं भक्तजनाय सम्प्रददतं वासो मणीन् हाटकम् ।
वामेनैव करेण दक्षिणकरे व्याख्यानमुद्राङ्कितं
शुक्रं दैत्यवरार्चितं स्मितमुखं वन्दे सिताङ्गं प्रभुम् ।।

हनुमान

मनोजवं मारुततुल्यवेगम् । जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यम् । श्रीरामदूतं शरणं प्रपद्ये ॥ ॥

अतुलितबलधामं हेमशैलाभदेहं
दनुजवनकृशानुं ज्ञानिनामग्रगण्यम् ।

गुरु शुक्र शनिभ्यश्च राहवेकेतवे नमः ॥ ॥

भास्कराय विद्महे । महद्द्युतिकराय धीमहि ।
तन्नो आदित्यः प्रचोदयात् ॥ ॥

ब्रह्मामुरारिस्त्रिपुरांतकारी
भानुशशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रश्च शनि राहु केतवः
कुर्वंतु सर्वे मम सुप्रभातम् ॥ ॥

सूर्य्यः शौर्य्यमथेन्दुरच्च पदबीं सन्मङ्गलं मङ्गलः
सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ।
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं
नित्यं प्रितीकरा भबन्तु ममते सर्बेनुकुला ग्रहाः ।।

उद्यत् कोटि दिबाकराभमनिषं शङ्खं गदां पङ्कजं
चक्रं कोटिराङ्गद हार कुण्डलधरं पीताम्बरं कौस्तुभैः ।
दीप्तं बिश्बधरं स्बबक्षसिलसत् राबसुमती ...।।

आ कृष्णेन् रजसा बर्तमानो निबेशयन्न अमृतं मर्त्यं च
हिरण्ययेन सबिता रथेना देबो याति भुबनानि पश्यन् ।।

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहनः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ।।

दधि शङ्ख तुषाराभं क्षीरोदार्णसम्भबम्
नमामी शशिनं सोमं शम्भोर्मुकुट भूषणम् ।।

सूर्य - ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् (यजु. 33। 43, 34। 31)

चन्द्र - ॐ इमं देवा असपत्नं सुवध्यं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्ये पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा।।
(यजु. 10। 18)

मंगल - ॐ अग्निमूर्धा दिव: ककुत्पति: पृथिव्या अयम्। अपां रेतां सि जिन्वति।। (यजु. 3।12)

बुध - ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सं सृजेधामयं च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यशमानश्च सीदत।। (यजु. 15।54)

गुरु - ॐ बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतुप्रजात तदस्मासु द्रविणं धेहि चित्रम्।। (यजु. 26।3)

शुक्र - ॐ अन्नात्परिस्त्रुतो रसं ब्रह्मणा व्यपित्क्षत्रं पय: सोमं प्रजापति:। ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु।। (यजु. 19।75)

शनि - ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्त्रवन्तु न:।। (यजु. 36।12)

राहु - ॐ कया नश्चित्र आ भुवदूती सदावृध: सखा। कया शचिष्ठया वृता।। (यजु. 36।4)

केतु - ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथा:।।
(यजु. 29।37)

सूर्य्य

रक्ताव्जयुग्माभयदानहस्तै केयूरहाराङ्गद कुण्डळाढ्यम् ।
माणिक्यमौळिं दिननाथमीडे वन्धुक कान्तिंविलसत्त्रिनेत्रम् ।।

राहु

पैठीनसो बर्बरदेशजातः शूर्पासनः सिंहगमः सुधूम्रः
याम्याननो रक्षगणस्तु मह्यं वरप्रदः शूळसचर्मखड्गः ।।

शनि

चापासनो गृध्र मयः सुनीळःप्रत्यङ्-मुखः काश्यपजः प्रतीच्याम् ।
समूळचापेषुवरप्रदश्च सौराष्ट्रदेश प्रभवश्च सौरिः ।।

केतु

ध्वजासनो जैमिनि गोत्र जातोंऽतर्वेद्यधीशोऽथ विचित्रवर्णः ।
याम्यैर्वृतो वायुदिङ्गीश खड्गचर्मा सुराचामशतो ह्यनेकः ।।

बृहस्पतिम्

सौम्येऽतिदीर्घे चतुरस्र पीठे रथेंऽगिराः सौम्यमुखः सुपीतः ।
दण्डाक्षमाळाम्वुजपात्रहस्तः सिन्ध्वाक्षदेशो वरदः सुजीवः ।।

वुध

उदङ्मुखो मागधजो हरिस्थश्चात्रेयगोत्रः शरमण्डळस्थः ।
सखड्गचर्माऽपिगदाघरो ज्ञः स्वीशानभागे वरदः सुपीतः ॥

चन्द्र

कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुविम्वाननं
मुक्तादामविभूषितेन वपुषा निर्मूळयन्तं नमः ।
हस्ताभ्यां कुमुदं वरं च दधतं नीळाळकोद्भासितं
स्वस्याङ्कस्थ भृगूदिताश्रयगुणं सोमं सुधाब्धिं भजे ।।

श्वेताम्बरः श्वेतवपुः किरीटी श्वेतद्युति दण्डधरो द्विबाहुः ।
चन्द्रोऽमृतास्मा वरदः शशाङ्कः श्रेयांसि मह्यं प्रददातु देबः ।।
दधिशङ्खतुषाराभं क्षीरोदार्णवसंभवम् ।
नमामी शशिनं सोमं शम्भोर्मुकुटभूषणम् ।।
क्षीरसिन्धुसमुत्पन्नो रोहिणीसहितः प्रभः ।

अञ्जनिः गर्भ सम्भुतो कपीन्द्रो सचिबोत्तमम्
रामप्रिय नमस्तुभ्यं हनुमान् रक्ष सर्बदा ।।

पञ्चस्याच्युतमनेक बिचित्र बीर्य्यम्
श्री शंख चक्र रमणीय भुजाग्रदेशम्
पीताम्बरम् मकर कुण्डल नूपुराङ्गम्
ध्यायेतितं कपिबरं हृति भाबयामि ।। ??

सर्बारिष्ट निबारकं शुभकरं पिङ्गाक्षमघापहम्
सितान्बेषण तत्परम् कपिबरम् कोटिन्दु सूर्य्यप्रभम्
लंका द्वीप भयङ्करं सकलदं सुग्रीब सम्मानितम्
देबेन्द्रादि समस्त देब बिनुतं काकुस्थ दूतम् भजे ।। ??

ख्यातः श्रीराम दूतः पबनतनुभबः पिङ्गलाक्ष शिखाबन्
सीता शोकापहारि दशमूखबिजयी लक्ष्मण प्राणदाता ।
आनेत भेषजाद्रेः लबणजलनिधेः लङ्घने दिक्षितः यः
बीर श्रीमान् हनुमन् मम मनसि बसन् कार्य्यसिद्धमधिम् तनोतु ।। ??

बालार्कायुत तेजसं त्रिभुबनप्रक्षोभकं सुन्दरं
सुग्रीबादि समस्त बानरगणैः संसेब्य पादाम्बुजं ।
नादेनैब समस्त राक्षसगणान् संत्रासयंतं प्रभुं
श्रीमद्रामपदाम्बुजस्मृतिरतं ध्यायामि बातात्मजम् ।।

ॐ दहन तप्तसुबर्णसमप्रभं भयहरं हृदयेबिहितांजलिम्
श्रबणकुण्डलशोभिमुखाम्बुजं नमत बानरराज मिहाद्भुतम् ।।

<u>श्रीगणेश</u>

सकलगुणनिधानं वानराणामधीशं
रघुपतिप्रियभक्तं वातजातं नमामि ।

बुद्धिर्बलं यशो धैर्यं निर्भयत्वमरोगता ।
अजाड्यं वाक्पटुत्वं च हनूमत्स्मरणाद्भवेत् ॥ ॥

ध्यायेद्बालदिवाकरद्युतिनिभं देवारीदर्पापहं
देवेन्द्रप्रमुखं प्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्वराळङ्कृतम् ।।
उद्यन्मार्तण्डकोटिप्रकटरुचियुतं चारुवीरासनस्थं
मौञ्जीयज्ञोपवीताभरणरुचिशिखं शोभित कुण्डळाङ्कम् ।
भक्तानाभिष्टदं तं प्रणतमुनिजनं वेदनादप्रमोदं
ध्यायेद्देवं विधेयं प्लवगकुळपतिं गोष्पदीभूतवार्धिम् ।।
वज्राङ्गं पिङ्गकेशाढ्यं स्वर्णकुण्डळमण्डितम्
निगूढमुपसंगम्य पारावार पराक्रमम् ।।
स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जळिम् ।
कुण्डळद्वयसंशोभिमुखांभोजं हरिं भजे ।।
सव्यहस्ते गदायुक्तं वामहस्त कमण्डळुम्
उद्यद्दक्षिणदोर्दण्डं हनुमन्तं विचिन्तयेत् ।।

ॐ महाशैळं समुत्पाट्य धावन्तं रावणं प्रति ।
तिष्ट तिष्ठ रणे दुष्ट घोररावं समुच्चरन् ।।
लाक्षारसारुणं गात्रं कालान्तक यमोपमम् ।
ज्वळदाग्निलसत्नेत्रं सूर्य्यकोटिसमप्रभम् ।।
अङ्गदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम् ।

एवंरूपं हनुमन्तं ध्यात्वा पूजां समारभेत् ।।

ध्यायेद्रणे हनुमन्तं कपिकोटि समन्वितम् ।
धावन्तं रावणं जेतुं दृष्ट्वा सत्वरमुत्थितम् ।।
लक्ष्मणं च महावीरं पतितं रणभूतळे ।
गुरुं च क्रोधमुत्पाद्य गृहीत्वा गुरुपर्वतम् ।।
हाहाकारैः सदर्पैश्च कम्पयन्तं जगत्रयम् ।
ब्रह्माण्डं स समावाप्य कृत्वा भीमं कळेवरम् ।।

वन्दे वानरनारसिंह खगराट्क्रोडाश्ववक्त्रान्वितं ।
दिव्याळङ्करणम् त्रिपञ्चनयनं देदीप्यमानं रुचा ।।
हस्ताव्जैरसिखेटपुस्तकसुधाकुम्भांकुशाद्रीन् हळं
खट्वाङ्गं फणिभूरुहं दशभूजं सर्वारिवीरापहम् ।।

श्रीमन्तं हनुमन्तमार्तरिपुभिर्भूभृत्तरुभ्राजितं
चाल्यद्वाळधिबन्धवैरिनिचयं चामीकराद्रिप्रभम् ।
अष्टौरक्तपिशंगनेत्रनळिनं भ्रुभङ्गमङ्गस्फुर -
त्प्रोद्य च्चण्डमयूखमण्डळमुखं दुःखापहं दुःखिनाम् ।।
कौपीनं कटिसूत्रमौंज्यजिनयुग्देहं विदेहात्मजा
प्राणाधीशपदारविन्दनिरतस्वान्तं कृतान्तं द्विषाम् ।।
ध्यात्वैवं समराङ्गणस्थितमथानीयं स्वहृत्पङ्कजे
संपूज्याखिळपूजनोक्तविधिना संप्रार्थये प्रार्थितम् ।।

उष्ट्रारुढ सुबर्चला सहचरन् सुग्रीब मित्राञ्जना
सूनो बायुकुमार केसरि तनूजाऽक्षादि दैत्यान्तक ।
सीतशोकहराग्निनन्दन सुमित्रासम्भब प्राणद
श्रीभीमाग्रज शम्भुपुत्र हनुमान् सूर्य्यास्य तुभ्यं नमः ।।

खड्गं खेटक भिण्डिपाल परशुं पाश त्रिशूल द्रुमान्
चक्रं शङ्खगदाफलाङ्कुश सुधाकुम्भान् हलं पर्बतं ।
टङ्क पर्बत कार्मुकाहिडमरुनेतानि दिब्यायुधान्
एबं बिंशतिबाहुभिश्च दधतं ध्यायेत् हनूमत्प्रभुम् ।।

बुद्धिर् बलम् यशो धैर्यम् निर्भयत्वम् अरोगताम्
अजाड्यम् वाक् पटुत्वम् च हनुमत् स्मरणात् भवेत्॥

गोष्पदीकृत बारीशं मशकीकृत राक्षसं
रामायणं महामालारत्नं बन्देऽनीलात्मजं ।
अञ्जनीनंदं बीरं जानकी शोकनाशनं
कपीशमक्षहन्तारं बन्दे लङ्काभयङ्करम् ।।

उलङ्घ्य सिन्धोः सलिलं सलीलं
जः शोकबह्निं जनकात्मजाया ।
आदाय तेनैब ददाह लंका
नमामि तं प्राञ्जलिराञ्जनेयम् ।।

आञ्जनेयमतिपाटलाननं
काञ्चनाद्रिकमनीय बिग्रहं
पारिजात तरुमूल बासीनं
भाबयामि पबमान नन्दनम् ।।

यत्रयत्र रघुनाथ कीर्त्तनं
तत्र तत्र कृतमस्तकाञ्जलिम्
बाष्पबारि परिपूर्णलोचनम्
मारुतिं नमत राक्षसान्तकम् ।।

पीयूषं निज-बाहुभिश्चदधतं पाशांकुशौ मुद्-गरं।
नागास्यं सततं सुरैश्च मुनिभिः सम्पूजितं संस्मरे।।

श्रीनरसिंह

ॐ वज्रनखाय विद्महे तीक्ष्ण दंष्ट्राय धीमहि तन्नो नरसिंह प्रचोदयात
।

ॐ उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखं ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥ ॥

यस्याभवद्भक्तजनार्दिहन्तुः
पितृत्वमन्येष्वविचार्य तूर्णम् ।
स्तम्भेऽवतारस्तमनन्यलभ्यम्
लक्ष्मीनृसिंहं शरणम् प्रपद्ये ॥ ॥

तप्तहाटक केशान्त ज्बलत्पाबक लोचन
बज्राधिकनखस्पर्श दिब्य सिंह नमोस्तुते ।।

पान्तु बो नरसिंहस्य नख लाङ्गुल कोटयः
हिरण्यकशिपोर्बक्षः क्षेत्रासृक् कर्दमारुणाः ।।

तव करकमलवरे नखमद्भुतशृङ्गम् ।
दलितहिरण्यकशिपुतनुभृङ्गम्॥
केशव धृत नरहरिरूप जयजगदीशहरे॥

ॐ नमो भगबते तुभ्यं पुरुषाय महात्मने
हरयेऽद्भुत सिंहाय ब्रह्मणे परमात्मने ।।

लम्बोदरं परम सुन्दरमेकदन्तं रक्ताम्बरं त्रिनयनं परमं पबित्रं
ऊद्यदिबाकरकरो ज्बलकायकान्तं बिघ्नेश्बरं सकल बिघ्नहरं नमामि ।।

त्बम् बिघ्न शतृदलनेति च सुन्दरेति भक्त प्रियेति सुखदेति फलप्रदेति
बिद्या प्रदेत्य हरेति ये स्तुबन्ति तेभ्यो गणेश बरदोभब नित्यमेब ।।

उद्यद्दिनेश्बररुचिं निजहस्तपद्मैः पाशाङ्कुशाभयबरान्दधतं गजास्यम् ।
रक्ताम्बरं सकल दुःखहरं गणेशं ध्यायेत्प्रसन्नमखिलाभरणाभिरामम् ।।

खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम् ।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥

सिन्दुराभं त्रिनेत्रं पृथुल जठरं prathutarajataram हस्त पद्मैर्दधानम्
दन्तं पाशाङ्गुशौ स्बं ह्युरुकरबिलसत् वीज पूराभिरामम् ।
बालेन्दु द्योत मौलिं गजपति बदनं धनपुरार्द्र गण्डं
भोगीन्द्रबद्ध भूषम् भजत गणपतिम् रक्तवस्त्राङ्गरागम् ।।

नमो गणेश बिघ्नेश गिरिजानन्दनं प्रभो
ममबिघ्न बिनाशाय गणाधिपतये नमः ।।

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गजाननं भूतगणादिसेवितं
कपित्थजंबूफलसारभक्षितम् ।

उमासुतं शोकविनाशकारणं
नमामि विघ्नेश्वरपादपङ्कजम् ॥ ॥

ॐकार सन्निभमिभाननमिन्दुभालम्
मुक्ताग्रबिन्दुममलद्युतिमेकदन्तं ।
लम्बोदरं कलचतुर्भुजमादिदेबं
ध्यायेन्महागणपतिं मतिसिद्धिकान्तं ।।

यं ब्रह्मा बेदान्तबिदो बदन्ति परो प्रधानं पुरुषं तथाऽन्ये
बिश्बोद्गतेः कारणमीश्बरं बा तस्मै नमो बिघ्नबिनाशकाय ।।

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ॥

एकदन्तं शूर्पकर्णं गजबक्त्रं चतुर्भुजम्
पाशाङ्कुशधरं देबं ध्यायेत्सिद्धि बिनायकं ।।

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानां एकदन्तमुपास्महे ॥ ॥

गजवक्त्रं सुरश्रेष्ठं कर्णचामरभूषितम् ।
पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम् ॥ ॥

एकदंतं महाकायं तप्तकाञ्चनसन्निभम् ।
लंबोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥ ॥
गजवदनमचिन्त्यं तीक्ष्णदंष्ट्रं त्रिनेत्रं
बृहदुदरमशेषं भूतिराजं पुराणम् ।
अमरवर–सुपूज्यं रक्तवर्णं सुरेशं
पशुपतिसुतमीशं विघ्नराजं नमामि ॥ ॥

मूषिकवाहन् मोदकहस्त चामरकर्ण विलम्बित सूत्र ।
वामनरूप महेश्वरपुत्र विघ्नविनायक पाद नमस्ते ॥ ॥

परंधामं परंब्रह्म परेशं परमेश्बरं
बिघ्ननिघ्नकरं शान्तं पुष्टंकान्तमनन्तकं
सुरासुरैन्द्रैः सिद्धेन्द्रैः स्तुतंस्तमे परात्परं ।
सुरपद्म दिनेशं च गणेशं मङ्गलायनम्
इदं स्तोत्रं महापुण्यं बिघ्नशोकहरं परं
यः पठेत् प्रातरुत्थाय सर्बबिघ्नात् प्रमुच्यते ।।

गजबदनम् चिन्त्यं तीक्ष्णदंष्ट्रं त्रिनेत्रं
बृहत् उदरमशेषं भुतिराजं पुराणम् ।
अमरबर सुपूज्यं रक्तबर्णं सुरेशं
पशुपतिसुतरीशं बिघ्नराजं नमामि ।
सर्बमङ्गल माङ्गल्यं सर्बकारण कारणं
भक्तानां बरदं ध्याये सिद्धिबुद्धि समन्बितम् ।।

दन्ताभये चक्रवरौ दधानं, कराग्रगं स्वर्णघटं त्रिनेत्रम्।
धृताब्जयालिङ्गितमाब्धि पुत्र्या-लक्ष्मी गणेशं कनकाभमीडे॥

देबेन्द्र मौलि मन्दार मकरन्द कणारुणाः
बिघ्नं हरन्तु हेरम्ब चरणाम्बुज रेणबः ।।

गणाङ्कुशवराभीतिपाणिरक्ताव्जहस्तया ।
प्रियया‌लिङ्गितं रक्तं त्रिनेत्रं गणपं भजे ।।

श्वेताभं शशि-शेखरं त्रिनयनं श्वेताम्बरालंकृतं।
श्रीवाणी-सहितं रमेश-वरदं पीयूष-मूर्ति प्रभुम्।।

नमामि रामं रघुवंशनाथम् ॥ ॥

भवाब्धिपोतं भरताग्रजं तं भक्तप्रियं भानुकुल *प्रदीपम्।*
भूतत्रिनाथं भुवनाधिपं तं भजामि रामं भवरोगवैद्यम् ॥

शांतं शाश्वतमप्रमेयमनवं निर्वाणशान्तिप्रदं
ब्रह्माशम्भुफणीन्द्रसेव्यमनिशं वेदान्तवेद्यं विभुम् ।
रामाख्यं जगदीश्वरं सुरगुरुं मायामनुष्यं हरिं
वन्देऽहं करुणाकरं रघुवरं भूपालचूडामणिम् ॥ ॥

वैदेहीसहितं सुरद्रुमतले हेमे महामण्डपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ ॥

वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयो वाय्वाधिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराज् तारासुतो जाम्बवान्
मध्ये नील सरोज कोमलरुचिं रामं भजे श्यामलम् ॥ ॥

कोमलाङ्गं विशालाक्षं इन्द्रनील समप्रभम्
दक्षिणाङ्गे दशरथं पुत्राप्येक्षेण तत्परम् ।
प्रष्टतो लक्षमणं देवं सछत्रं कनक प्रभम्
पार्श्वे भरत शत्रुघ्न चामर व्यजनान्वितौ
अग्रेत्यग्रौ हनूमन्तं रामानुग्रह कांक्षिणम् ॥ ॥

दूरीकृत सीतार्तिः प्रकटीकृत रामवैभव स्फूर्तिः ।
दारित दशमुख कीर्तिः पुरतो मम भातु हनूमतो मूर्तिः ॥ ॥

(भागबत 7.10.10)

नमस्ते नरसिंहाय प्रह्लादाह्लाद दायिने
हिरण्यकशिपोर्बक्षः शिला-टङ्क-नखालये ।।

इतो नृसिंहः परतो नृसिंहो यतो यतो यामि ततो नृसिंहः
बहिर्नृसिंहो हृदये नृसिंहो नृसिंहमादिं शरणं प्रपद्ये ।।

बागीश यस्य बदने लक्ष्मीर्यस्य च बक्षसि
यस्यास्ते हृदये सम्बित् तं नृसिंहम् अहं भजे ।।

मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरुपस्तदलं भयानकम्
प्रतप्तचामीकरचंडलोचनं स्फुरत्सटाकेशरजृम्भिताननम् ।
करालदंष्ट्रं करवालचञ्चल क्षुरान्तजिहबं भृकुटीमुखोल्बणम्
स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुत ब्यात्तास्यनासं हनुभेदभीषणम् ।
दिविस्पृशत्कायमदीर्घपीवर ग्रीवोरुवक्षः स्थलमल्पमध्यमम्
चन्द्रांशुगौरैशछुरितं तनूरुहैर्बिष्बग्भुजानीकशतं नखायुधम् ।
दुरासदं सर्वनिजेतरायुध प्रवेकविद्रावितदैत्यदानवम् ।।

(श्रीमद् भागवतम्)

श्री गोविन्द मुकुन्द केशव शिव श्री बल्लभ श्रीनिधे
श्री बैकुण्ठ सुकण्ट कुञ्चितखला स्बामीन् अकुण्ठोदय ।
शुद्ध ध्योय बिधुतधुर्तधबल श्रीमाधब अधोक्षज
श्रीद्धबद्ध भिदेहि नस्त्बयि धियम् धोरम् धरित्रो धर ।।

माणिक्यादि समप्रभं निजरुचा संत्रस्तरक्षो गणं
जानुन्यस्त कराम्बुजं त्रिनयनं रत्नोल्लसत्भूषणम् ।
बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्राग्रबक्त्रोल्लस-
ज्ज्बालाजिह्बमुदग्र केशनिचयं बन्दे नृसिंहं बिभुम् ।।

उद्यत्कोटी रबिप्रभं नरहरिं कोटीरहारोज्बलम्
दंष्ट्राभीममुखे लसन्नखमुखैर्दीर्घैरनेकैर्भुजैः ।
निर्भिन्नासुरनाथमग्निशशभृत्सूर्य्यात्मनेत्रत्रयं
बिद्युत्पुञ्ज जटाकलाप भयदं बह्नि बमंतं भजे ।।
गर्जन्तं गर्जयन्तं निजभुजपटलं स्फोटयन्तं हठन्तं
रूप्यन्तं तापयन्तं दिवि भुवि दितिजं क्षेपयन्तं क्षिपन्तम् |
क्रन्दन्तं रोषयन्तं दिशि दिशि सततं संहरन्तं भरन्तं
वीक्षन्तं घूर्णयन्तं शरनिकरशतैर्दिव्यसिंहं नमामि ||
(श्रीनृसिंहकवचम्)

उद्योत् विद्योति नीनां झट झटित झटा झाट नादा सटानां
अन्योन्य दंष्ट्रद्रष्टा रड रड नरडा डम्वरु डम्वराढ्यां
झं झं झं टम्प झम्पा झम झमित झम्यां झङ्क झङ्कार घोरं
वः पायात् काळ काळ किळ किळित गदा चक्र हस्तो नृसिंहः ।।

डं डं डं दारूदण्डं रडबि रड रडं ब्रह्मदण्डं प्रचण्डं
डिम्पि डिम्पि डिडिम्पि डहसिच डहसा झङ्क झङ्कार घोर
तुल्यं तुल्यं तत्तुल्यं दशनख नखदो संक्र संकाक्षकाक्षं
वः पायात् काळ काळ किळ किळित गदा चक्र हस्तो नृसिंहः ।।

स्वप्नेपि नित्यं जगतां त्रय़ाणां
स्रष्टा च हन्ता विभुरप्रमेय़ः ।
त्राता त्वमेकः त्रिविधो विभिन्नः
तं त्वाम् नृसिंहम् सततं नतोस्मि ।।

श्रीरामः

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थम् ।
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभम् ।
नानालङ्कारदीप्तं दधतमुरुजटामँडनं रामचंद्रम् ॥ ॥

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरम् ।
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेंद्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिम् ।
वंदे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥ ॥

रामाय रामभद्राय रामचंद्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ ॥

दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वंदे रघुनंदनम् ॥ ॥

लोकाभिरामं रणरङ्गधीरम् ।
राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यरूपं करुणाकरं तम् ।
श्रीरामचंद्रम् शरणं प्रपद्ये ॥ ॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे ।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहम् ।
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ ॥

नीलांबुजश्यामलकोमलाङ्गं
सीतासमारोपितवामभागम् ।
पाणौ महासायकचारुचापं

संस्तुयमानं मुनिभिः सर्वतः परिसेवितम् ।
सीताळङ्कृतवामाङ्गं लक्ष्मणेनोपशोभितम् ।।
श्यामं प्रसन्नवदनं सर्वाभरणभूषितम् ।।

विष्णुः, कृष्णः

शांताकारं भुजगशयनं पद्मनाभं सुरेशम्
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ॥

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयप्रदीपः ॥ ॥

यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुवन्ति दिव्यैः स्तवैः
वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ ॥

सर्वस्मिन् सर्वभूतस्त्वं सर्वः सर्वस्वरूपधृक्।
सर्वं त्वत्तस्ततश्च त्वमेवं सर्वात्मने नमः॥
सर्वात्मकोऽसि सर्वेश सर्वभूतस्थितो यतः।
कथयामि ततः किं ते सर्वं वेत्सि हृदि स्थितम्॥

कायेन वाचा मनसेंद्रियैर्वा ।
बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
आकर्णपूर्ण धन्वानौ रक्षेतां रामलक्ष्मणौ ॥ ॥

राम राम राम राम रामनामतारकं
राम कृष्ण वासुदेव भक्तिमुक्तिदायकम् ।
शङ्कराय गीयमानपुण्यनामकीर्तनं
जानकीमनोहरं श्रीरामचन्द्रमं भजे ॥ ॥

उद्भवस्थितिसंहारकारिणीं क्लेशहारिणीम् ।
सर्वश्रेयस्करीं सीताम् नतोहं रामवल्लभाम् ॥
यन्मायावशवर्तिविश्वमखिलं ब्रह्मादिदेवासुराः
यत्सत्त्वादमृषैव भाति सकलं रज्जौ यथाहेर्भ्रमः ।
यत्पादप्लवमेव भाति हि भवाम्भोधेस्तितीर्षावताम्
वन्देहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥
प्रसन्नतां या न गताभिषेकतः तथा न मम्लौ वनवासदुःखतः
मुखाम्बुजश्री रघुनन्दनस्य मे सदास्तु सा मंगलमंजुलप्रदा ।

नीलाम्बुजश्यामलकोमलांगं सीतासमारोपितवामभागम्
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ॥

मूलं धर्मतरोः विवेकजलधेः पूर्णेन्दुमानन्ददम्
वैराग्याम्बुजभास्करं त्वघहरं ध्वान्तापहं तापहम् ।
मोहाम्भोधरपुञ्जपाटनविधौ खे सम्भवं शंकरम्
वन्दे ब्रह्मकुलकलंकशमनं श्रीरामभूपं प्रियम् ॥

सान्द्रानन्दपयोदसौभगतनुं पीताम्बरं सुन्दरम्
पाणौ बाणशरासनं कटिलसत्तूणीरभारं वरम् ।
राजीवायतलोचनं धृतजटाजूटेन संशोभितम्

सीतालक्ष्मणसंयुतं पथिगतं रामाभिरामं भजे ॥

कुन्देदीवरसुन्दरावतिबलौ विज्ञानधामावुभौ
शोभाढ्यौ वरधन्विनौ श्रुतिनुतौ गोविप्रवृन्दप्रियौ ।
मायामानुषरूपणौ रघुवरौ सद्धर्मवर्मौ हि तौ
सीतान्वेषणतत्परौ पथिगतौ भक्तिप्रदौ तौ हि नः ॥

ब्रह्माम्भोधिसमुद्भवं कलिमलप्रध्वंसनं चाव्ययम्
श्रीमच्छम्भुमुखेन्दुसुन्दरवरे संशोभितं सर्वदा ।
संसारामयभेषजं सुमधुरं श्रीजानकीजीवनम्
धन्यास्ते कृतिनः पिबन्ति सततं श्रीरामनामामृतम् ॥

शान्तं शाश्वतमप्रमेयमनघं निर्वाणशान्तिप्रदम्
ब्रह्माशम्भुफणीन्द्रसेव्यमनिशं वेदान्तवेद्यं विभुम् ।
रामाख्यं जगदीश्वरं सुरगुरुं मायामनुष्यं हरिम्
वन्देऽहं करुणाकरं रघुवरं भूपालचूडामणिम् ॥

केकीकण्ठाभनीलम् सुरवरविलसद्विप्रपादाब्जचिह्नम्
शोभाढ्यं पीतवस्त्रं सरसिजनयनं सर्वदा सुप्रसन्नम् ।
पाणौ नाराचचापं कपिनिकरयुतं बन्धुना सेव्यमानम्
नौमीड्यं जानकीशं रघुवरमनिशं पुष्पकारूढरामम् ॥

आत्रानामार्तिहन्तारं भीतानां भीतिनाशनम् ।
द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥

श्रीराघवं दशरथात्मजमप्रमेयम् सीतापतिं रघुकुलान्वयरत्नदीपम् ।
आजानुबाहुमरविन्ददलायताक्षं रामं निशाचरविनाशकरं नमामि ॥
वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे मध्ये

पुष्पकमासने मणिमये वीरासने संस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परम्
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

नान्या स्पृहा रघुपते हृदयेस्मदीये सत्यं वदामि च भवानखिलान्तरात्मा
।
भक्तिं प्रयच्छ रघुपुङ्गव निर्भरां मे कामादिदोषरहितं कुरु मानसं च ॥

आपदामपहर्तारं दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥
रामाय रामचन्द्राय रामभद्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे ।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहम् ।
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥
राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥

नीळाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्वुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तीं मुकुटाङ्गदादिविविधाकळ्पोज्ज्वळाङ्गं भजे ।।

अयोध्यानगरे रम्ये रत्नसौन्दर्यमण्डपे ।
मन्दारपुष्पैरावद्धवितानतोरणाङ्किते ।।
सिंहासनसमारुढं पुष्पकोपरि राघवम् ।
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः ।।

कृष्णाय वासुदेवाय देवकी नंदनाय च ।
नंदगोपकुमाराय गोविंदाय नमो नमः ॥ ॥

वसुदेव सुतं देवं कंस चाणूरमर्दनं ।
देवकी परमानंदं कृष्णं वंदे जगद्गुरुं ॥ ॥

आकाशात् पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारान् केशवं प्रतिगच्छति ॥ ॥

आदौ देवकिदेविगर्भजननं गोपीगृहे वर्धनम्
मायापूतनजीवितापहरणं गोवर्धनोद्धारणम् ।
कंसच्छेदनकौरवादिहननं कुंतीसुतां पालनम्
एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ।

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥ ॥

एकं शास्त्रं देवकीपुत्रगीतमेको
देवो देवकीपुत्र एव ।
एको मन्त्रस्तस्य नामानि यानि
कर्माप्येकं तस्य देवस्य सेवा ॥ ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥ ॥

करारविन्देन पादारविन्दं मुखारविन्दे विनिवेशयन्तं ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥ ॥

करोमि यद्यत् सकलं परस्मै ।
नारायणायेति समर्पयामि ॥ ॥

अच्युतं केशवं रामनारायणम् ।
कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभम् ।
जानकीनायकं रामचंद्रं भजे ॥ ॥

ॐ उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं
पार्श्वद्वंद्वं जळधिसुतया विश्वधात्र्या च पुष्टम् ।
नाना रत्नोल्लासिताविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमळकौमोदकीचक्रपाणिम् ।।

उद्यदादित्यसंकाशं पीतवाससमच्युतम् ।
शङ्खचक्रगदापाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ।।

विष्णुं भास्वत्किरीटाङ्गदवळयगणा कळपहारोदरां-
घ्रिश्रोणीभूषां सुवक्षोमणिमकरमहाकुण्डळं मण्डितांगम् ।
हस्तोद्योच्चक्रशंखाम्बुजगदममळं
पीतकौशेयवासो
विद्युद्भासं समुद्यद्दिनकरसदृशं पद्महस्तं नमामि ।।

मङ्गलं भगवान्विष्णुर्मङ्गलं गरुडध्वजः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनं हरिः ॥ ॥

वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणबिम्बफलाधरोष्ठात्।

पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्
कृष्णात्परं किमपि तत्त्वमहं न जाने॥

सशङ्खचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षःस्थलकौस्तुभश्रयं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥ ॥

नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥ ॥

मेघश्यामं पीतकौशेयवासं
श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं
विष्णुं वन्दे सर्वलोकैकनाथम् ॥ ॥

विष्णुं शारदचन्द्रकोटिसदृशं शङ्खं रथाङ्गं गदा
मम्भोजं दधतं सिताब्ज निळयं कान्त्या जगन्मोहनम् ।
आवद्धाङ्गदहारकुण्डळमहामौळिं स्फुरत्कङ्कणं
श्रीवत्साङ्कमुदारकौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतम् ।।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरं शुचिः ॥ ॥

आर्ताः विषण्णाः शिथिलाश्च भीताः
घोरेषु च व्याधिषु वर्तमानाः ।

सङ्कीर्त्य नारायणशब्दमात्रं
विमुक्तदुःखाः सुखिनो भवन्ति ॥ ॥

नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोऽस्तुते ॥ ॥

क्षीराम्भोनिधिरत्नमण्डपमहासौबर्ण सिंहासने
बामाङ्के स्थितया प्रसन्न बदनं श्रीकान्तयालिङ्गितम् ।
दोर्दण्डाङ्कित शंख पङ्कजगदा चक्रैरुदारश्रियं
त्बाम् नित्य कलयामि जन्मबिमुखो लक्ष्मीश नारायण ।।
(अष्टाक्षरादि मन्त्र)

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूष वर्षैः
आनन्दी नः पुनीयादरिनलिनगदा शङ्खपाणिर्मुकुन्दः ॥ ॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्र सूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः
चित्रं रंरम्यते तं त्रिभुवन वपुषं विष्णुमीशं नमामि ॥ ॥

छायायां पारिजातस्य हेमसिंहासनोपरि
आसीनमम्बुदश्याममायताक्षमलङ्कृतम् ।
चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कित वक्षसं
रुक्मिणी सत्यभामाभ्यां सहितं कृष्णमाश्रये ॥ ॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभगव्ययः ॥ ॥

दधि वामनः

मुक्तागौरं नवमणिलसद्भुषणं चन्द्रसंस्थं
भृङ्गाकारैरलकनिकरैः शोभिवक्त्रारविन्दम् ।
हस्ताव्जाभ्यां कनक कळशं शुद्धतोय़ाभिपूर्णं ।
दध्यन्नाढ्यं कनकचषकं धारय़न्तं भजामः ।।

सरस्वतीः

या कुन्देन्दु तुषार हार धवला या शुभ्रवस्त्रावृता
या वीणावरदँड मँडितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवै सदा वंदिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥

शुक्लाम् ब्रह्मविचार सार परमाम् आद्याम् जगद्व्यापिनीम् |
वीणा पुस्तक धारिणीम् अभयदाम् जाड्यान्धकारापाहाम् ||
हस्ते स्फाटिक मालिकाम् विदधतीम् पद्मासने संस्थिताम् |
वन्दे ताम् परमेश्वरीम् भगवतीम् बुद्धि प्रदाम् शारदाम् ||

आधारे लिङ्गनाभौ प्रकटित हृदय़े ताळुमूळे ललाटे
द्वे पत्रे षोडशारे द्विदशदशदळे द्वादशार्द्धे चतुष्के
बासान्ते वाळमध्य़े डफकठ सहिते कण्ठदेशे स्वराणां
हंक्षं तत्वार्थयुक्तं सकळदळगतं बर्णरूपं नमामी ।।

या देबी स्तुयते नित्यं बिबुधैर्बेदपरागैः

कस्तूरीतिलकं ललाटफलके वक्षस्थले कौस्तुभं
नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम् ।
सर्वाङ्गे हरिचंदनं च कल्याण कण्ठेच मुक्तावलिन्
गोपस्त्री परिवेष्टितो विजयते गोपाल चूडामणि ॥ ॥

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणत क्लेश नाशाय गोविन्दाय नमो नमः ।

वसुदेव सुतं देवं कंस चाणूरमर्दनं ।
देवकी परमानंदं कृष्णं वंदे जगद्गुरुं ॥

यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुवन्ति दिव्यैः स्तवैः
वेदैः साङ्गपदक्रमोपनिषदैः गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

उद्यत्कोटिदिवाकराभमनिशं शंख गदां पंकजं
चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम्।
कोटीरांगदहारकुण्डलधरं पीताम्बरं कौस्तुभै-
र्दीप्तं श्विधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे॥

ब्रह्मेशाद्यैः परित उरभिः सुपबिष्ट्यै समेतै
लक्ष्म्या सिञ्जद् बलय करया सादरं बिज्यमानः ।
नर्मक्षेली प्रहसन मुखैर्ब्याप्लुबन् पङ्क्ति मध्यं
भुक्तेपात्रे कनक घटिते षड् रसं श्री सुरेशं ।।

व्रजे प्रसिद्धम् नवनीत चौरम् | गोपान्गनानाम् च दुकूल चौरम् ||
अनेक जन्मार्जित पाप चौरम् | चौराग्रगण्यम् पुरुषम् नमामि |१|

श्री राधिकाय हृदयस्य चौरम् | नवाम्बुद श्यामल कान्ति चौरम् ||
पदाश्रितानाम् च समस्त चौरम् | चौराग्रगन्याम् पुरुषम् नमामि |२|

बर्हाचुडाभिरामं मृगमद तिलकं कुण्डलाक्रान्त गण्डं
कन्जाक्षं कम्बुकण्ठं स्मितमुख सुभगं चाधरे न्यस्तबेणु ।
श्यामं सौम्यं शुभाङ्गं रबिकर बसनं भूषितं बैजयन्त्या
बन्दे बृन्दाबनस्थं युबती परिबृतं ब्रह्मगोपाल बेशं ।।

जगन्नाथः

नीलाचलनिवासाय नित्याय परमात्मने
बलभद्रसुभद्राभ्यां जगन्नाथाय ते नमः

जगदानन्दकन्दाय प्रणतार्तहराय च
नीलाचलनिवासाय जगन्नाथाय ते नमः

रक्ताम्भोरुहदर्पभञ्जनमहासौन्दर्यनेत्रद्वयं
मुक्ताहारविलम्बिहेममुकुटं रत्नोज्ज्वलत्कुण्डलम् ।
वर्षामेघसमाननीलवपुषं ग्रैवेयहारान्वितं
पार्श्वे चक्रधरं प्रसन्नवदनं नीलाद्रिनाथं भजे ॥ १॥

फुल्लेन्दीवरलोचनं नवघनश्यामाभिरामाकृतिं
विश्वेशं कमलाविलासविलसत्पादारविन्दद्वयम् ।
दैत्यारिं सकलेन्दुमंडितमुखं चक्राब्जहस्तद्वयं
वन्दे श्रीपुरुषोत्तमं प्रतिदिनं लक्ष्मीनिवासालयम् ॥ २॥

उद्यन्नीरदनीलसुन्दरतनुं पूर्णेन्दुबिम्बाननं
राजीवोत्पलपत्रनेत्रयुगलं कारुण्यवारांनिधिम् ।

भक्तानां सकलार्तिनाशनकरं चिन्तार्थिचिन्तामणिं
वन्दे श्रीपुरुषोत्तमं प्रतिदिनं नीलाद्रिचूडामणिम् ॥ ३॥

नीलाद्रौ शंखमध्ये शतदलकमले रत्नसिंहासनस्थं
सर्वालंकारयुक्तं नवघन रुचिरं संयुतं चाग्रजेन ।
भद्राया वामभागे रथचरणयुतं ब्रह्मरुद्रेन्द्रवंद्यं
वेदानां सारमीशं सुजनपरिवृतं ब्रह्मदारुं स्मरामि ॥ ४॥

दोर्भ्यां शोभितलांगलं समुसलं कादम्बरीचञ्चलं
रत्नाढ्यं वरकुण्डलं भुजबलैराकांतभूमण्डलम् ।
वज्राभामलचारुगण्डयुगलं नागेन्द्रचूडोज्ज्वलं
संग्रामे चपलं शशांकधवलं श्रीकामपालं भजे ॥ ५॥

वराह

आपादं जानुदेशाद्वरकनकनिभं नाभिदेशादधस्तान्
मुक्ताभं कण्ठदेशात्तरुणरविनिभं मस्तकान्नीळभाषम् ।
ईडे हस्तैर्दधानं रथचरणदरैः खड्गखेटौ गदाभ्यां
शक्तिं दानाभये च क्षितिधरणलसद्दंष्ट्रमाद्यं वराहम् ।।

हयग्रीवः

धवळनळिननिष्ठं क्षारगौरं कराग्रै-
र्जपवळयसरोजे पुस्तकाभीष्टदानैः ।
दधतममळवस्त्राकल्पदानाभिरामं
तुरगवदनविष्णुं नौमि विद्याध्रजिष्णुम् ।।

शरच्छशाङ्कप्रभमश्ववक्त्रं मुक्तामयरौभरणैरुपतेम् ।
रथाङ्गशङ्खाञ्चितवाहुयुग्मं जानुद्वयन्यस्तकरं भजामः ।।

हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मां वराङ्गीम् ।
सर्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्तमूर्तिं सकलसुरनुतां सर्वसम्पत्प्रदात्रीम् ॥ ॥

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपाङ्कुराम् ।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥ ॥

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदाम् ।
हस्ताभ्यामभयप्रदां मणिगणैर्नाना विधैर्भूषिताम् ॥ ॥
भक्ताभीष्टफलप्रदाम् हरिहर ब्रह्मादिभिः सेविताम् ।
पार्श्वे पङ्कज शङ्खपद्मनिधिभिर्युक्ताम् सदा शक्तिभिः ॥ ॥

मातर्नमामि कमले कमलायताक्षि
श्रीविश्णुहृत्कमल वासिनि विश्वमातः ।
क्षीरोदजे कमलकोमल गर्भ गौरि
लक्ष्मी ! प्रसीद सततं नमतां शरण्ये ॥ ॥

समुद्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्वमे ॥ ॥

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गंभीरावर्तनाभिस्तनभरनमिता शुभ्र वस्त्रोत्तरीया ।
या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुम्भैः
सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता ।।

अमल कमल संस्था तद्रजःपुंजवर्णा
कर-कमल-धृतेष्टाभीति युग्माम्बुजां च।

सा मे बसतु जिह्बाग्रे ब्रह्मरुपा सरस्बती ।।

वीणाधरे विपुल मंगल दान शीले भक्तार्त्तिनाशिनी विरञ्चि हरीशवन्द्ये।
कीर्तिप्रदेऽखिल मनोरथदे महार्हे विद्या प्रदायिनि सरस्वति नौमि
नित्यम् ।।

कज्बल पुरित लोचन भारे , स्तनयुग शोभित मुक्ता हारे ।
बीणा पुस्तक रञ्जित हस्ते , भगबती भारती देबी नमस्ते ।।

ॐ वांगदेवि विद्महे विरंत्रिचपत्न्यै च धीमहि तन्नो वाणी प्रचोदयात् ।

विनायकं गुरूं भानुं: ब्रह्माविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ: सर्वकार्यर्थसिद्धये ।।

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥

दोर्भिर्युक्ताचतुर्भिः स्फटिकमणि निभैरक्षमालांदधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
भासा कुन्देन्दु शंखस्फटिकमणिनिभा भासमाना समाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ।।

माणिक्यवीणां उपालालयन्तीं मदालसां मंजुल वाग्विलासाम् ।
माहेन्द्रनील द्युति कोमलांगी मातंगकन्यां मनसा स्मरामि ।।

चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुकंमरागशोणे ।
पुण्ड्रोक्षु पाशांकुश पुष्पवाण हस्ते नमस्ते जगदेकमातः ।।

माता मरकतश्यामा मातंगी मदशालिनी ।
कुर्यात्कटाक्षं कल्याणी कदम्बवनवासिनी ।।

जय मातंगतनये । जयनीलोत्पलद्युते ।
जय संगीतरसिके । जय लीलाशुकप्रिये ।।

पद्मपत्र विशालाक्षी पद्मकेसरवर्णिनीं ।
नित्यपद्मालया देवी सामाँ पातु सरस्वती ।।

सरस्वतीत्ययं हृष्टा वीणा पुस्तक धारिणी ।
हंसवाहन सम्युक्ता विद्यादानकरी मम् ।।

नमस्ते शारदादेवि काश्मीर पुरवासिनि ।
त्वामहं प्रार्थय विद्यादानं च देहि मे ।।

अक्षरस्त्रजं हरिणपोतमुदग्रटंकं,
विद्यां करैरविरतं दधतीं त्रिनेत्राम् ।
अर्धेन्दुमौलिमरुणामरविन्दरामां
वर्णेश्वरीं प्रणमतस्तनभारनम्राम् ॥

सुरासुर सेवित पाद पङ्कजा
करे विराजित कमनीय पुस्तका ।
विरिञ्चि पत्नी कमलासनस्तिथा
सरस्वती नृत्यतु वाचि मे सदा ॥

जय जय देवि चराचरसारे कुचयुगशोभित मुक्ताहारे ।
वीणापुस्तकरंजितहस्ते भगवति भारति देवि नमस्ते ॥ ॥

मुक्ता कुन्देन्दु गौरा मणिमय मुकुटां रत्नताटङ्क य़ुक्ताम्
अक्षस्रक् पुष्पहस्तां अभयबरकरां चन्दचूडं त्रिनेत्रां ।
नानालङ्कारय़ुक्तां सुरमुकुटमणिं द्योतिभिः स्बर्णपीठां
सानन्दां सुप्रसन्नां त्रिभुबन जननीं चेतसा चिन्तयामि ।।

आशासु राशीभबदङ्गबल्ली भासैब दासीकृत दुग्धसिन्धुम् ।
मन्दस्मितैर्निन्दितशारदेन्दुं बन्देऽरबिन्दासन सुन्दरी त्बाम् ।।

पंचाशाल्लिपीभीर्विभक्तमुखदोःपत्संधिवक्षस्थळां
भास्वन्मौळिनिबद्धचन्द्रशकळामापीनतुंगस्तनीम् ।
मुद्रामक्षगुणं सुदार्द्ध्य़ कळशं बिद्य़ां च हस्ताम्बुजैः
बिभ्राणां विशदप्रभां त्रिनय़नां बाग्देवतामाश्रय़े ।।

मुक्ताविद्रुमहेम-नीलधवलच्छायैर्मुखैस्त्रीक्षणैः
युक्तामिन्दुकलानिबद्धमुकुटां तत्त्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशाशूलं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगुलं हस्तैर्वहन्तीं भजे ॥ ॥

HamsarUdha harabhasitha harendu kundavadhata,
VanI mandasmithyuta mukhI maulibhandendu lekha,
Vidhya veenamrutha maya ghatakshasragadeepthahasta,
Shubrabjastha bhavadhabhimathaprapthaye bharathee syath.

Let our wishes be fulfilled by goddess Sarawathi,
Who rides on a swan, who is of the colour of,
Ash worn by Lord Shiva, chain of pearl,
Moon and the jasmine flower,
Who has a face lit by her slight smile,
Who wears the crescent on her head,
Who holds in her four hands, book,
Veena, pot of nectar and a chain of rudraksha, whose seat is a
white lotus.

महालक्ष्मी

ध्यायेत् पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं

गारूडोपळसन्निभां मणिमौळिकुण्डळमण्डितां नौमिभालविलोचनां
महिषोत्तमाङ्ग निषेदुषीम् ।
चक्रशंखकृपाणखेटकवाणकार्मुकशूळकांस्तर्ज्जनीमपि विभ्रतीं निजवाहुभिः
शशिशेखराम् ।।

मातङ्गीम्

घनश्यामळाङ्गीं स्थितां रत्नपीठे शुकस्योदितं शृण्वतीं रक्त वस्त्राम्
सुरापानमत्तां सरोजस्थितां श्रीं भजे वल्लकीं वादयन्तीं मतंङ्गीम् ।।

त्रिपूरसुन्दरीम्

वाळार्कयुततेजसं त्रिनयनां रक्ताम्वरोल्लासिनीम्
नानाळङ्कृतिराजमानवपुषं वाळोड्डराट् शेखराम् ।
हस्तैरिक्षुधनुःसृणिं सुमशरं पाशं मुदा विभ्रतीं
श्रीचक्र स्थित सुन्दरीं त्रिजगतामाधारभूतां स्मरेत् ।।

त्रिपूरभैरवीम्

उद्यत्भानुसहस्रकान्तिमरुणक्षौमां शिरोमाळिकाम्
रक्तालिप्त पयोधरां जपपरां विद्यामभीतिं वरम् ।
हस्ताव्जै र्द्धतीं त्रिनेत्रविलसत् वक्त्रारविन्दश्रीयं
देवीं वद्धहिमांशु रत्नमुकुटां वन्दे सुमन्दस्मिताम् ।।

काळरात्रिम्

मणिमुक ुट विचित्रा-लंकृता-कल्पज ेलैः,
भबतिभुवन माता संततं श्रीः श्रियै र्नः।।

सुरासुरेंद्रादि किरीट मौक्तिकै:
युक्तं सदा यत् तव पादपङ्कजं
परावरं पातु वरं सुमङ्गलं
नमामि भक्त्या अखिल काम सिद्धये ||

पद्मनाभ प्रियां देविं पद्माक्षीं पद्मबासिनिं
पद्मवर्णां पद्महस्तां बन्दे पद्मां अहर्निशीं ।
पुर्णेन्दु बदनाम् दिब्यरत्नाबरण भूषिताम्
बरदाभय हस्ताभ्यां ध्यायेत् चन्द्र सहोदरीम् ।
इच्छारूपं भगबति सच्चिदानन्द रुपिणिं
सर्बज्ञां सर्ब जननीं बिष्णुबक्षस्थलालयां ।
दयाबतीं ध्यायेत् नित्यं सुखसिद्धि स्बरुपिणिम् ।।

सिन्दूरारुणकान्तिमब्जवसतिं सौन्दर्यवारांनिधिं
कॊटीराङ्गदहारकुण्डलकटीसूत्रादिभिर्भूषिताम् ।
हस्ताब्जैर्वसुपत्रमब्जयुगला दर्शौवहन्तीं परां
आवीतां परिचारिकाभिरनिशं ध्यायॆ प्रियां शार्ङ्गिणः ॥ १ ॥

भूयात् भूयॊ द्विपद्माभयवरदकरा तप्तकार्तस्वराभा
रत्नौघाबद्धमौलिर्विमलतरदुकूलार्तवालॆपनाढ्या ।
नाना कल्पाभिरामा स्मितमधुरमुखी सर्वगीर्वाणवनद्या
पद्माक्षी पद्मनाभॊरसिकृतवसतिः पद्मगा श्री श्रियॆ वः ॥ २ ॥

वन्दॆ पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्यामभयप्रदां मणिगणैर्नानाविधैर्भूषिताम् ।

भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिस्सेवितां
पार्श्वे पङ्कजशङ्खपद्मनिधिभिर्युक्तां सदा शक्तिभिः ॥ ३ ॥

बिश्वरुपस्य भार्यासि पद्मे पद्मालये शुभे
सर्बतः पाहिमां देबी महालक्ष्मि नमस्तुते ।।

ॐ कान्त्या कांचन सन्निभां हिमगिरी प्रक्षैश्चतुर्भिर्गजै
र्हस्तोत्क्षिप्त हिरण्मयामृतघटैरासिच्यमानाश्रीयम् ।
बिभ्राणांबरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्बलां
क्षौमाबद्धनितम्बबिंबलसितां बन्देऽरबिन्द स्थिताम् ।। (मन्त्रमहार्णब)

ॐ माणिक्य प्रतिमप्रभां हिमनिभैस्तुंगैश्चतुर्भिगजै
र्हस्ताग्राहितरत्नकुम्भसलिलैरासिच्यमानां मुदा ।
हस्ताब्जैर्बरदानमम्बुजयुगा भितीर्दधानां हरेः
कान्तां काक्षितपारिजातलतिकां बन्दे सरोजासनाम् ।। (मन्त्रमहार्णब)

ब्राह्मीं च बैष्णबीं भद्रां षड्भुजां च चतुर्मुखीं
त्रिनेत्रां खड्गशूलाभी पद्मचक्रगदाधराम् ।
पीताम्बरधरां देबीं नानालङ्कार भूषिताम्
तेजः पुञ्जधरां श्रेष्ठां ध्यायेद्बालकुमारीकाम् ।। (मन्त्रमहार्णब)
उद्यत् भास्कर सन्निभा स्मितमुखी रक्ताम्बरा लेपना
सत्कुम्भं धनभाजनं सृणिमथो पाशं करैर्बिभ्रती ।
पद्मस्था कमलेक्षणा दृढकुचा सौन्दर्य्य बारानिधि
र्धातब्या सकल बिलास फलदा श्री ज्येष्ठलक्ष्मीरियम् ।। (मन्त्रमहार्णब)

कल्पद्रमाधो मणिबेदिकायां समास्थिते बस्त्रबिभूषणाढ्ये
भूमिश्रियौ बांछितबामदक्ष संचिन्तये द्बेबमुनीन्द्रबन्द्ये ।। (मन्त्रमहार्णब)

त्रैलोक्य पूजिते देबी कमले बिष्णुबल्लभे
यथा त्बमचला कृष्णे तथा भब मयि स्थिरा ।
कमला चंचला लक्ष्मीश्चला भूतिर्हरिप्रिया
पद्मा पद्मालया सम्यगुच्चैः श्रीपद्मधारिणी ।
द्बादशैतानि नामानि लक्ष्मीं सम्पूज्य यः पठेत्
स्थिरा लक्ष्मीर्भबेत्तस्य पुत्रदारादिभिः सह ।। (बिश्बसारतन्त्र)

हस्तद्बयेन कमले धारयन्तीं स्बलीलया
हारनूपुर संयुक्तां लक्ष्मीं देबीं बिचिन्तये ।
शंखचक्रगदाहस्ते शुभ्रबर्णे सुबासिनि
ममदेहि बरं लक्ष्मी सर्बसिद्धिप्रदायिनि ।। (लक्ष्मी हृदय)

गङ्गा

उत्फुल्लामळपुण्डरीक रुचिरा कृष्णेशबिन्ध्य़ात्मिका
कुम्भेष्ठाभय़तोय़ जानि दधती श्वेताम्बराळंकृता
हृष्टास्य़ा शशिशेखराऽखिळनदी शोणादिभिः सेविता
ध्य़ेय़ा पापविनाशिनी मकरगा भागीरथी साधकैः ।।

वाळाम्

रक्ताम्वरां चन्द्रकळावतंसां समुद्य़दादित्य़निभां त्रिनेत्राम्
विद्य़ाक्षमाळाभय़दानहस्तां ध्य़ाय़ामि वाळामरुणांम्वुजस्थाम् ।।

महिषमर्दिनिम्

ॐ माणिक्याभरणान्बितां स्मितमुखीं नीलोत्पलाभां बरां
रम्यालक्तकालिप्तपादकमलां नेत्रत्रयोल्लासिनीम् ।
बीणाबादन तत्परां सुरनतां कीरच्छदृश्यामलां
मातंगीं शशिशेखरामनुभजे ताम्बूलपूर्णाननाम् ।। (मन्त्रमहार्णब)

श्यामाङ्गी शशिशेखर त्रिनयनां बेदैः करैर्बिभ्रतीं
पाशंखेटमथांकुशं दृढमसिं नाशाय भक्तद्विषाम् ।
रत्नालंकरण प्रभोज्ज्बलतनुं भास्बत्किरीटां शुभां
मातंगीं मनसा स्मरामि सदयां सर्बार्थ सिद्धिप्रदाम् ।। (मन्त्रमहार्णब)

ॐ गुन्जानिर्मितहार भूषितकुचां सद्यौबनोल्लासिनी
हस्ताभ्यां नृकपाल खड्गलतिके रम्ये मुदा बिभ्रतीम् ।
रक्तालंकृतिबस्त्रलेपनलसद्देहप्रभां ध्यायताम्
नृणां श्री सुमुखीं शबासनगतां स्युः सर्बदा सम्पदः ।। (मन्त्रमहार्णब)

शबोपरि समासीनां रक्ताम्बर परिच्छदाम्
रक्तालंकार संयुक्तां गुंजाहार बिभूषिताम् ।
षोडशाब्दां च युबतीं पीनोन्नत पयोधराम्
कपालकर्त्रिकाहस्तां परं ज्योतिः स्बरूपिणीम् ।। (मन्त्रमहार्णब)

चतुर्भुजे चन्द्रकलावतंसे
कुचोन्नते कुङ्कुमरागशोणे ।
पुण्ड्रेक्षु पाषंङ्क्ष पुष्पबाण
हस्ते नमस्ते जगदेकमातः ॥

कात्यायन्यै च विद्महे । कन्यकुमार्यै धीमहि ।

उद्यन्मार्तण्ड कान्तिं विगळित कवरीं कृष्णवस्त्रावृताङ्गीम्
दण्डंलिङ्गं कराव्जैर्वरमथ भुवनं संधधानां त्रिनेत्राम्
नानाकळ्पैर्विभासं स्मितमूख कमळां सेवितां देवसंघै
र्मायाराज्ञीं मनोभृशर विकळतनूमाश्रये काळरात्रिम् ।।

भुवनेश्वरीम्

उद्यदिनद्युतिमिन्दु किरीटां तुङ्ग कुचां नयन त्रय युक्ताम्
स्मेरमुखिं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेश्वरीम् ।।

नारसिंही

अक्षस्रजं बीजपरं कपाळं पङ्कजं करैः ।
वहन्तीं हेमसङ्काशां महालक्ष्मीं समीसमाम् ।।

उग्रताराम्

ध्यायेत् कोटिदिबाकरद्युतिनिभां बाळेन्दुयुक्छेखराम्
रक्ताङ्गीं रसनां सुरक्त वसनां पूर्णेन्दुबिम्बाननाम् ।
पाशं कर्त्रिमहाङ्कुशादि दधतीं दोर्भिश्चतुर्भिर्युताम्
नानाभूषण भूषितां भगवतीं तारां जगत्तारिणीम् ।।

आनन्दभैरवीम्

भावयेच्च सुरां देवीं चन्द्रकोटियुतप्रभाम्
हेमकुन्देन्दु धवळां पञ्चवक्त्रां त्रिलोचनाम् ।
अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम्

प्रहसन्तीं विशाळाक्षीं देवदेवस्य संमुखीम् ।

वगळामूखीम्

ॐ सौवर्णासनसंस्थितां त्रिनयनां पीतां शुकोल्लासिनीम् ।
हेमाभांगरुचिं शशांकमुकुटां सच्चम्पकस्रग्युताम् ।।
हस्तैर्मुद्गर पाशवज्ररसनाः संविभ्रतीं भूषणैः।
व्याप्ताङ्गीं वगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत् ॥

मद्ध्येसुधाब्धि मणिमण्डपरत्न वेदीसिंहासनोपरिगतां परिपीत-वर्णाम् ।
पीताम्बराभरण-माल्य-विभूषितांगीम्
देवीं नमामि धृत-मुद्-गर-वैरि-जिह्वाम् ।।
जिह्वाग्रमादाय करेण देवीं व्वामेन शत्रुन्परिपीडयन्तीम् ।
गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजान्नमामि ।

श्रीदेबी

तप्तस्वर्णनिभा शशाङ्कमुकुटा रत्नप्रभाभासुरा
नानावस्त्र विराजिता त्रिनयनां भूमिरमाभ्यां युता ।
दर्वीं हाटकभाजनं च दधती रम्योच्चपीनस्तनी
नित्यं तं शिवमाकळय्य मुदिता ध्येयान्नपूर्णेश्वरी ।।

सौबर्णाम्बुज मध्य गात्र नयनां सौदामिनीं सन्निभां
शङ्खंचक्रबराभयानि दधतौ चन्द्रकला बिभ्रतीं ।
राज़ेयंङ्गदहार कुण्डल धरामाखड्डलादौस्थितां
द्ध्यायेत् बिन्ध्य बिलासिनीं शशिमुखि पार्श्वस्थ पञ्चाननः ।।

ध्यायेत् सुबर्ण बर्नाभ्याम् त्रिनेत्रां चारु हासिनिम्
सर्ब लक्षण सम्पर्णा अर्धेन्दुकृत शेखरां
चतुर्भुजां शंखचक्रधरां बालां सुरूपिणीम्
उद्यत् त्रिशूल निर्भिर्नाम‌ महिषां सिङ्घबहिनीम्
मुक्ता दामलसत्कण्ठां मुनिभिः स्तुतिपाठकैः
सिधैर्देबगणैर्जुष्टां कौमारीभिश्च सेवितां
सर्ब कामप्रदां दुर्गा बरदां भक्तबत्सलाम् ॥

भवानी त्वं महालक्ष्मी: सर्व काम प्रदायिनी
सुपूजिता प्रसन्ना स्यात् महालक्ष्मि नमो (अ)स्तु ते ||

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।

अन्नपूर्णे सदापूर्णे शङ्करः प्राणवल्लभे ।
ज्ञान वैराग्य सिद्ध्यर्थं भिक्षां देहि च पार्वती ॥ ॥

विश्वेश्वरीं जगद्धात्रीं स्थिति संहार कारिणीम् ।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभो ॥ ॥

ॐ मेघश्यामरुचिं मनोहरकुचां नेत्रत्रयोद्भासितां
कोलास्यां शशिशेखरामचलया दंष्ट्रातले शोभिताम् ।
बिभ्राणां स्बकराम्बुजैरासिलतां चर्मासि पाशं सृणि
बाराहीमनुचिन्तयेद्धयबरारुढां शुभालंकृतिम् ।। (मन्त्रमहार्णब)

श्रद्धा सतां कुलजनप्रभवस्य लज्जा,
तां त्वां नता:स्म परिपालय देवी विश्वम् ॥

सेवन्तिका वकुल चम्पुक पाटलाब्जै
पुन्नाग जाति करवीर शाल पुष्पै: ।
विल्वा प्रवाल तुलसी दलमालतिभी:
त्वं पुजयामी जगदिश्वर मे प्रसिद ॥

आयु द्रोणसूते श्रीयं दशरथे शत्रुक्षयं राघवे ।
ऐश्वर्यं नहुषे गतिश्च पवने मानञ्च दुर्योधने ।।
दानं सूर्यसुते बलं हलधरे सत्यम् च कुन्ती सुते । (क)
वा
शौर्यं शान्तनवे बलं हलधरे सत्यम् च कुन्ती सुते । (ख)
विज्ञानं विदुरे भवतु भवतां कृतिश्च नारायणे ।।१।।

ह्रीं कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शंखंचक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनोत्रां ।
सिंहस्कन्धाधिरुढां त्रिभूबनमखिलं तेजसां पुरयन्तीं
ध्यायेद् दूर्गां जयाख्यां त्रिदश परिबृतां सेबितां सिद्धिकामैः ।।

हेम प्राकारमध्ये सुरबिट पितले रत्नपीठाधिरुढां
य़क्षीं बालां स्मरामः परिमल कुसुमोद्भासिधमिलभाराम् ।
पीनोतुंगस्तनाढ्यां कुबलय नयनां रत्नकाञ्ची कराभ्याम्
भ्राम्यद्रक्तोत्पलाभां नबरबि बसनां रक्तभूषाङ्गरागाम् ।।

कुंकुमोदर गर्भाभां किंचित् य़ौबन शालिनीम्
मृणालकोमलभूजां केयुराङ्गद भूषिताम् ।
नीलोत्पलदृशं किंचिदुधत्कुचबिराजिताम्

तन्नो दुर्गा प्रचोदयत् ॥ ॥

सर्व मङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके गौरी नारायणी नमोऽस्तुते ॥

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ॥ ॥
शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ ॥
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थ्यै स्मिता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःख भयहारिणी का त्यदन्या
सर्वोपकार करणाय सदाद्रचिता ।

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत् ।
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ॥
पाणिभ्यामलिपूर्णरत्नचषकं संविभ्रतीं शाश्वतीं ।
सौम्यां रत्नघटस्थमध्यचरणां ध्यायेत्परामम्बिकाम् ॥२॥
ॐ जटा जूट समायुक्त ामर्धेन्दु कृत शेखराम्
लोचनत्रय संयुक्तां प ूर्णेन्दुसद ृशाननाम ् ।
तप्तकाञ्चन बर्णाभां सुप्रतिष्ठां सुलोचनाम्
नबय़ौबन सम्पन्नां सर्बाभरण भूषिताम् ।
सुचारु दशनां देबीं पीनोन्नत पयोधराम्
त्रिभङ्ग स्थान संस्थानां महिषासुर मर्द्दिनीम् ।।

जयन्ती मंगला काली भद्रकाली कपालिनी |
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ||

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे |
रूपं देहि जयं देहि यशो देहि द्विषो जहि ||
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि |
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ||
देहि सौभाग्यमारोग्यं देहि मे परमं सुखम् |
रूपं देहि जयं देहि यशो देहि द्विषो जहि ||
यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तमलं बलं च |
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ||
हे गौरी शंकरार्धांगी। यथा त्वं शंकर प्रिया।
तथा मां कुरु कल्याणी, कान्त कान्तां सुदुर्लभाम्।।
विघुद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम्।
हस्तैश्चक्रदरालिखेटविशिखंश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे॥
सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः
शंख चक्रधनुः शरांश्च दधती नेत्रैस्त्रिभिः शोभिता।
आमुक्तांगदहारकंकणरणत्काञ्चीरणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला॥

ध्यायेदेबी महागौरीं किशोरी पित बर्णिका
सद्योपद्म धरादक्षे बराहस्तां सुशोभनां
तिष्ठन्ति पद्ममध्यस्थां दिब्यपार्श्वे स्थिताननां
सुदिब्य बसनां देबी नानालङ्कार भूषितां ।।

श्वेताम्बरां शारद चन्द्रकान्ति सद् भूषणां चन्द्रकलांबतंसाम्
कर्त्रीकपालान्बित पाणिपद्मां तारां त्रिनेत्रां प्रभजेखिलद्धयै ।।

बन्धुक कुशुमाभासां पञ्चमुण्डाधिबासिनीम्
स्फुरच्चन्द्रकला रत्नमुकुटां मुण्डमालिनीम् ।
त्रिनेत्रां रक्तबसनां पीनोन्नतट्टटस्तनीम्
पुस्तकंचाक्षमालांच बरंचाभयकं क्रमात् ।
दधतीं संस्मरेन्नित्यमुत्तराम्नायमानीताम् ।।

य़ा चण्डी मधुकैटभादिदैत्यदलनी य़ा महिषोन्मूलिनी
य़ा धूम्रेक्षण चण्डमुण्डमथनी य़ा रक्तबीजाशनी ।
शक्तिः शुम्भनिशुम्भ दैत्यदलनी य़ा सिद्धिदात्री परा
सा देबी नबकोटिमूर्त्तिसहिता मां पातु बिश्बेश्बरी ।।

खड्गं चक्रगदेषु चापपरिधान्छूलं भुशुण्डी शिर:
शंख संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम !
निलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम!!

अक्षस्रक्परशु गदेषु कुलिशं पद्मं धनु: कुंडिकां
दण्डं शक्तिमसिं च चर्म जलजं घटां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे शेरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ।
घण्टाशूलहलानि शंखमुसले चक्रं धनु:सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ।
गौरिदेहसमुद्भवां त्रिजगतामाधारभूतां
महापूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥

या श्री: स्वयं सुकृतिनां भवनेष्वलक्ष्मी:,
पापात्मानां कृतधियां ह्रदयेषु बुद्दि:।

सर्वे भवंतु सुखिनः सर्वे संतु निरामयाः ।
सर्वे भद्राणि पश्यंतु मा कश्चिद् दुःखभाग्भवेत् ॥ ॥
ॐ सह नाववतु । सह नौभुनक्तु ।
सहवीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु । मा विद्विषावहै ।
ॐ शांतिः शांतिः शांतिः ॥ ॥
ॐ असतो मा सद्गमय । तमसो मा ज्योतिर्गमय ।
मृत्योर्मा अमृतं गमय ।
ॐ शांतिः शांतिः शांतिः ॥ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवा ।
भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः ।
व्यशेम देवहितं यदायुः ॥ ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्तिनस्ताक्ष्यो अरिष्टनेमिः । स्वस्तिर्नो बृहस्पतिर्दधातु ॥ ॥

ॐ सर्वेषां स्वस्तिर्भवतु । सर्वेषां शान्तिर्भवतु ।
सर्वेषां पूर्णं भवतु । सर्वेषां मङ्गलं भवतु ।।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःख भाग्भवेत् ।।
ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतं
शृणुयाम शरदः शतं प्रब्रवाम शरदः शतं
अदीनाः स्यां शरदः शतं भूयश्च शरदः शतात् ॥ ॥

भजेहं भ्राम्यकमलबराभय समन्बिताम् ।
तुलाकोटी परिभ्रान्त पादपद्मद्वयान्षिताम्
माणिक्यहार मुकुट कुण्डलादि बिभुषितां ।
रक्तबस्त्र परीधानां ताम्बुलाधरपल्लबाम्
हेमप्राकार मध्यस्थां रत्नसिंहासनेस्थितां ।।

गायत्री

ॐ मुक्ताविद्रुमहेमनीळधवळच्छायैर्मुखैस्त्रीक्ष्णै
-र्युक्तामिन्दुनिवद्धरत्नमुकुटां तत्वार्थवर्णात्मिकाम् ।
गायत्रींवरदाभयाङ्कुशकशापाशं कपाळं गुणं
शंखं चक्रमथारविन्दयुगळं हस्तैर्वहन्तीं भजे ।।
कुमारीमृग्वेदयुतां ब्रह्मरूपां विचिन्तयेत् ।
हंसस्थितां कुशकरां सूर्यमण्डळ संस्थिताम् ।।
मध्याह्ने विष्णुरूपां च ताक्ष्र्यस्थां पीत वासिनीम् ।
युवतीं सयजुर्वेदां सूर्यमण्डळ संस्थिताम् ।।
सायाह्ने शिवरूपां च वृद्धां वृषभवाहिनीम् ।
सूर्यमण्डळ मध्यस्थां सामवेद समायुताम् ।।

वर्णास्त्रां कुण्डिकाहस्तां शुद्धनिर्मळज्योतिषम् ।
सर्वतत्त्वमयीं वन्दे गायत्रीं वेदमातरम् ।।

वरुणः

वरुणोधवळोविष्णुः पुरुषो निर्मळाननः
पाशहस्तो महाभीमस्तस्मै नित्यं नमोनमः ।।
ॐ चन्द्रप्रभं पङ्कजसन्निषणं पाशाङ्कुशाभीतिवरं दधानम्

मुक्ताविभूषांचितसर्वगात्रं ध्यायेत् प्रसन्नं बरुणं विभूत्यै ।।

कुवेरः

मनुजवाह्याविमान वरस्थितं गरुडरत्ननिभं निधिनायकम्
शिवसखं मुकुटादिविभूषितं वरगदे दधतं भज तुंदिळम् ।।

गरुडः

तप्तस्वर्णनिभं फणीन्द्रनिकरैः क्लृप्ताङ्गभूषं प्रभुं स्मर्तृणां
शमयन्तमुग्रमखिळं नृणां विषं तत्क्षणात् ।
चंच्वग्रप्रचळद्भुजङ्गमभयं पाय्वोर्वरं बिभ्रतं पक्षोच्चारितसामगीतममळं
श्रीपक्षिराजं भजे ।।

श्रीगुरु

ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरु साक्षात परं ब्रह्म तस्मै श्रीगुरवे नमः ॥॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ॥
अज्ञानतिमिरान्धस्य ज्ञानांजनशलाकया ।

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ॥
ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥ ॥

स्फटिकरजतवर्णं मौक्तिकीमक्षमाला-
ममृतकलशविद्यां ज्ञानमुद्रां कराग्रे ।
दधतमुरगकक्ष्यं चन्द्रचूडं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्तिमीडे ॥ ३॥
भस्मव्यापाण्डुरङ्गः शशिशकलधरो ज्ञानमुद्राक्षमाला-
वीणापुस्तैर्विराजत्करकमलधरो योगपट्टाभिरामः ।
व्याख्यापीठे निषण्णो मुनिवरनिकरैः सेव्यमानः प्रसन्नः
सव्यालः कृत्तिवासाः सततमवतु नो दक्षिणामूर्तिरीशः ॥ ८॥

मुद्रापुस्तकवह्निनागविलसद्बाहुं प्रसन्नाननं
मुक्ताहारविभूषणं शशिकलाभास्वत्किरीटोज्ज्वलम् ।
अज्ञानापहमादिमादिमगिरामर्थं भवानीपतिं
न्यग्रोधान्तनिवासिनं परगुरुं ध्यायाम्यभीष्टाप्तये ॥ १४॥

ॐ नमः शिवाय गुरवे सच्चिदानन्दमूर्तये।
निष्प्रपञ्चाय शान्ताय निरालम्बाय तेजसे॥

आनन्दमानन्दकरं प्रसन्नं ज्ञान स्बरुपं निजबोधरुपम्
योगीन्द्रमीड्यं भबरोगबैद्यं श्रीमद्गुरुं नित्यमहं भजामि ।।

शान्तिपाठ

स्वस्ति प्रजाभ्यः परिपालयन्ताम् ।
न्यायेन मार्गेण महीं महीशाम् ।
गो ब्राह्मणेभ्यः शुभमस्तु नित्यं ।
लोकाः समस्ताः सुखिनो भवंतु ॥ ॥

काले वर्षन्तु पर्जन्यः पृथिवी शस्यशालिनी ।
देशोयं क्षोभरहिताः ब्राह्मणाः संतु निर्भयः ॥ ॥
ॐ पूर्णमदः पूर्णमिदँ पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।
ॐ शान्तिः शान्तिः शान्तिः ॥ ॥

अग्निं प्रज्वालितं वन्दे जातवेदं हुताशनम् ।
हिरण्यमनलं वन्दे समृद्धं विश्वतोमुखम् ॥ ॥

श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् ।
आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन ॥ ॥

दीपज्योतिः परब्रह्म दीपज्योतिर्जनार्दनः ।
दीपो हरतु मे पापं दीपज्योतिर्नमोऽस्तुते ॥ ॥

त्वमेव माता च पिता त्वमेव ।
त्वमेव बंधुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव ।
त्वमेव सर्वं मम देवदेव ॥ ॥

नमोऽस्तु रामाय सलक्ष्मणाय
देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्र यमनिलेभ्यो
नमोऽस्तु चन्द्राग्नि मरुत्गणेभ्यः ॥ ॥

कार्पण्य दोषोपहत स्वभावः
पृच्छामि त्वां धर्म सम्मूढचेताः ।
यच्छ्रेयस्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ॥

देश मातृका

वंदे मातरम् ।

सुजलां सुफलां मलयजशीतलाम्
स्यश्यामलां मातरम् । वंदे मातरम् ।

शुभ्रज्योत्स्नापुलकितयामिनीं
फुल्लकुसुमितद्रुमदलशोभिनीं
सुहासिनीं सुमधुर भाषिणीं
सुखदां वरदां मातरम् ॥
वंदे मातरम् ।

कोटि-कोटि-कण्ठ-कल-कल-निनाद-कराले,
कोटि-कोटि-भुजैधृत-खरकरवाले,
अबला केन मा एत बले ।
बहुबलधारिणीं नमामि तारिणीं
रिपुदलवारिणीं मातरम् ॥
वंदे मातरम् ।

तुमि विद्या, तुमि धर्म
तुमि हृदि, तुमि मर्म

त्वं हि प्राणाः शरीरे
बाहुते तुमि मा शक्ति
हृदये तुमि मा भक्ति
तोमारई प्रतिमा गडि मन्दिरे-मन्दिरे मातरम् ॥
वंदे मातरम् ।

त्वं हि दुर्गा दशप्रहरणधारिणी
कमला कमलदलविहारिणी
वाणी विद्यादायिनी, नामामि त्वाम्
कमलां अमलां अतुलां सुजलां सुफलां मातरम् ॥
वंदे मातरम् ।

श्यामलां सरलां सुस्मितां भूषितां
धरणीं भरणीं मातरम् ॥
वंदे मातरम् ।

❋